TIGHT BINDING BOOK

Sri Balamanorama Series No. 18.

॥ श्रीः ॥

॥ नागानन्दम् ॥

श्रीहर्षदेवप्रणीतं नाटकरत्नम्

NÂGÂNANDA

A Sanskrit Play by Śri Harṣa Deva

WITH ENGLISH TRANSLATION AND NOTES BY

C. Sankara Rama Sastri, M. A., B. L.,
Advocate, Mylapore, Madras.

PRINTED AND PUBLISHED BY
THE SRI BALAMANORAMA PRESS,
MYLAPORE, MADRAS.

Price Re. 1-8-0] 1932 [Postage Extra

PREFACE

King Harṣa of Sthāneśwara who reigned from about A. D. 606 to 648, the patron of Bāṇa who celebrates him in his Harṣacarita and of the Chinese pilgrim, Huyan Tsang, is the author of the three plays:—Nāgānanda, Ratnāvalī and Priyadarśikā. He is different from Śrī Harṣa, the author of Nāiṣadha There are certain common characteristics in the three plays and also some common stanzas. Of the three plays, Nāgānanda is generally treated as the best, and the latest of the author's productions.

The noble and highly exalted sentiment of Dayāvīra is the dominant Rasa in this play, whose effect is heightened by a rather elaborate treatment of Śṛṅgāra or the erotic which is the subsidiary Rasa brought out in the first three Acts. The very small interval between the Hero's wedlock and Garuḍa's incident deepens the tragic and brings out the Hero in the best of colours. Hāsya also finds a place at the beginning of the Third Act which gives the scene of a drunkard's revel as a subsidiary to the subsidiary Śṛṅgāra. Bībhatsa and Bhayānaka can be noticed in the description of the cemetary

in the Fourth Act, Rāudra in the advent of Garuḍa and his preying upon the Hero, Karuṇa in the lamentations of Śaṅkhacūḍa's mother in the Fourth Act and of the Hero's parents and wife in the Fifth Act. Adbhuta can also be noticed in passages like अहो गीतम् अहो वादित्रम् , क्षिप्त्वा विम्बं, अहो जगद्विपरीतमस्य महासत्त्वस्य चरितम् , in the appearance of Gāurī, the shower of nectar, and so on.

On the other hand, the Dhvanyāloka school of thinkers hold that the dominant Rasa in the play is शान्त which ultimately leads to the sacrifice of his body by the Hero. It is first brought out in the verses:—रागस्यास्पदमित्यवैमि, तिष्ठन् भाति पितुः, and न्याय्ये वर्त्मनि etc., but gradually grows dim by the अद्भुतरस which bridges the gulf between the शान्त and शृङ्गार, and is brought into play by the passage अहो गीतम् अहो वादित्रम् , and strengthened by the śloka व्यक्तिर्व्यञ्जनधातुना etc. and the statement निर्दोषदर्शनाः कन्यकाः. For Śānta and Śṛṅgāra are not mutually incompatible, provided some other Rasa intervenes suitably. Then Śṛṅgāra receives emphasis and becomes more pronounced by the support of Hāsya arising from the scene of Śekharaka, and on being intercepted by Vīra by Mitrāvasu's śloka beginning with संसर्पद्भिः समन्तात् it disappears, giving room to the Śānta which again asserts itself and continues to the end of the play. According to the earlier school of

rhetoricians, the Śānta Rasa itself is not recognised, and following their wake the more modern Dhanika, the author of Daśarūpaka, criticises the Śānta Rasa theory, or at any rate the propriety of introducing Śānta in dramas. He says:—सर्वथा नाटकादावभिनेयात्मनि स्थायित्वमस्माभिः शमस्य निषिध्यते, तस्य समस्तव्यापारप्रविलयरूपस्याभिनयायोगात्। यत्तु कैश्चिन्नागनन्दादौ शमस्य स्थायित्वमुपवर्णितं तत्तु मलयवत्यनुरागेण आप्रबन्धप्रवृत्तेन विद्याधरचक्रवर्तित्वप्राप्त्या च विरुद्धम्। अतो दयावीरोत्साहस्यैव तत्र स्थायित्वम्. It must be borne in mind that the Vīrarasa is of three kinds:—युद्धवीर as of Rāma in Mahāvīracarita, दानवीर as of Paraśurāma and Bali, and दयावीर as of Jīmūtavāhana in Nāgānanda.

That the Hero of this play, Jīmūtavāhana, a Bodhisattva, belongs to the most exalted type of heroes known as Dhīrodātta is fully discussed with *pros* and *cons*, and established in the following extract from Daśarūpaka.

अथ धीरोदात्तः—

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः।
स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रतः॥

महासत्त्वः शोकक्रोधाद्यनभिभूतान्तःसत्त्वः। अविकत्थनोऽनात्मश्लाघनः। निगूढाहंकारो विनयच्छन्नावलेपः। दृढव्रतोऽङ्गीकृतनिर्वाहको धीरोदात्तः। यथा नागानन्दे—'जीमूतवाहनः—

सिरामुखैः स्यन्दत एव रक्तमद्यापि देहे मम मांसमस्ति।
तृप्तिं न पश्यामि तवेह तावत्किं भक्षणात्त्वं विरतो गरुत्मन्॥'

यथा च रामं प्रति—

'आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥'

यच्च केषांचित्स्थैर्यादीनां सामान्यगुणानामपि विशेषलक्षणे क्वचित्संकीर्तनं तत्तेषां तत्राधिक्यप्रतिपादनार्थम् । ननु च कथं जीमूतवाहनादिर्नागानन्दादावुदात्त इत्युच्यते । औदात्त्यं हि नाम सर्वोत्कर्षेण वृत्तिः । तच्च विजिगीषुत्व एवोपपद्यते । जीमूतवाहनस्तु निर्जिगीषुतयैव कविना प्रतिपादितः । यथा—

'तिष्ठन्भाति पितुः पुरो भुवि यथा सिंहासने किं तथा
किं संवाहयतः सुखानि चरणौ तातस्य किं राजकम् ।
किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरो-
रायासः खलु राज्यमुज्झितगुरोस्तेनास्ति कश्चिद्गुणः ॥'

इत्यनेन ।

'पित्रोर्विधातुं शुश्रूषां त्यक्त्वैश्वर्यं क्रमागतम् ।
वनं याम्यहमप्येष यथा जीमूतवाहनः ॥'

इत्यनेन च । अतोऽस्यात्यन्तशमप्रधानत्वात्परमकारुणिकत्वाच्च वीतरागवच्छान्तता । अन्यच्चायुक्तं यत्तथाभूतं राज्यसुखादौ निरभिलाषं नायकमुपादायान्तरा तथाभूतमलयवत्यनुरागोपवर्णनम् । यच्चोक्तं सामान्यगुणयोगी द्विजादिर्धीरशान्त इति, तदपि पारिभाषिकत्वादवास्तवमित्यभेदत्वम् । अतो वस्तुस्थित्या बुद्ध-युधिष्ठिर-जीमूतवाहनादिव्यवहाराः शान्ततामाविर्भावयन्ति ।

अत्रोच्यते—यत्तावदुक्तं सर्वोत्कर्षेण वृत्तिरौदात्त्यमिति, न तज्जीमूतवाहनादौ परिहीयते । न ह्येकरूपैव विजिगीषुता । यः केनापि शौर्यत्यागदयादिनान्यानतिशेते स विजिगीषुः, न यः परोपकारेणार्थग्रहादिप्रवृत्तः । तथात्वे च मार्गदूषकादेरपि धीरोदात्तत्वप्रसक्तिः । रामादेरपि जगत्पालनीयमिति दुष्टनिग्रहप्रवृत्तस्य नान्तरीयकत्वेन भूम्यादिलाभः । जीमूतवाहनादिस्तु प्राणैरपि परार्थसंपादनाद्विश्वमप्यतिशेत इत्युदात्ततमः । यथोक्तम्—'तिष्ठन्भाति—' इत्यादिना विषयसुखपराङ्मुखतेति, तत्सत्यम् । कार्पण्यहेतुषु स्वसुखतृष्णासु निरभिलाषा एव जिगीषवः । यदुक्तम्—

'स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव ।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छाययोपाश्रितानाम् ॥'

इत्यादिना । मलयवत्यनुरागोपवर्णनं त्वशान्तरमाश्रयं शान्तनायकतां प्रत्युत निषेधति । शान्तत्वं चानहंकृतत्वं तच्च विप्रादेरौचित्यप्राप्तमिति वस्तुस्थित्या विप्रादेः शान्तता न स्वपरिभाषामात्रेण । बुद्धजीमूतवाहनयोस्तु कारुणिकत्वाविशेषेऽपि सकामनिष्कामकरुणत्वादिधर्मत्वाद्भेदः । अतो जीमूतवाहनादेर्धीरोदात्तत्वमिति ।

The source of the plot of this play can be traced to Bṛhatkathā— a work written in the Paiśācī language by Guṇāḍhya who lived about the 1st century A. D. Of course Bṛhatkathā is not now available to us. But there are two renderings of it in Sanskrit, one by Kṣemendra, viz., the Bṛhatkathāmañjarī, and the other by Somadeva, viz., the Kathāsaritsāgara, both of whom lived in the 11th century A. D. From a comparison of the Kathāsaritsāgara, 23rd Taraṅga, 16th chapter, with the present drama, it will be easily perceived that the author of this play faithfully follows the original except in such places as necessitate a variation of the plot for the purpose of dramatisation. For example, in the original, the Hero and the Heroine learn each other's name at the first interview. But in view of the later attempted suicide of the Heroine, the dramatist cleverly keeps the Heroine in the dark

about the identity of the Hero. For an idea of similar variations in the plot, the reader will do well to go through the original Kathāsaritsāgara itself.

The Nāndī in praise of Buddha and the description of the part played by Gāurī in the plot show that at least in the view of the author there was no antagonism between the two great faiths of the East, viz., Hinduism and Buddhism, and also that in his time both the religions were equally respected.

With regard to the time-analysis of the play, it can be easily observed that the Fifth Act is practically a continuation of the Fourth Act and that there is absolutely no interval between the two. Between the Third Act which deals with the marriage and the Fourth Act which deals with the Hero's stroll to the beach, a few days must have elapsed, but not exceeding ten in number, for red garments have been ordered to be taken to the bridegroom for 10 days from the date of matrimony. The Third Act begins in a morning and ends in the evening of the same day. Between the Second and Third Acts there is no interval. The end of the Second Act announces the marriage, and the Third Act deals with the jubilation on the happy occasion. But between the First and Second Acts a few days must have elapsed in order to enable the Hero to say नीताः किं न निशाः शशाङ्कधवलः and Viśvāvasu

to say वत्स मित्रावसो कुमारो जीमूतवाहनोऽस्माभिरिहाश्रमवासात् सुपरीक्षितः । तद्योग्योऽयं वरः, तस्मै वत्सा मलयवती प्रतिपाद्यताम्. Kulapati Kāuśika's words reproduced by the Hermit वत्स शाण्डिल्य पितुराज्ञया युवराजो मित्रावसुः भविष्यद्विद्याधरचक्रवर्तिनं कुमारं जीमूतवाहनमिहैव मलयपर्वते क्वापि वर्तमानं भगिन्या मलयवत्या वरहेतोर्द्रष्टुम् अद्य गतः perhaps refer to a preliminary interview which Mitrāvasu seeks with a view to ascertain whether the Hero will be a suitable bridegroom, and not to an interview at which he actually makes the offer. All the scnes of the Act, it may be clearly seen, are laid in the Malaya mountain.

With regard to the comic scene of Śekharaka at the beginning of the Third Act, the propriety of including it in the Aṅka itself instead of making it a separate Interlude, is likely to be called in question, especially as the scene has no bearing on the growth of the plot. But a careful analysis of the development of the Rasa will disclose that the poet has advisedly done so. Only incidents of little value or details that have no bearing on the Rasa can be indicated in an Interlude according to the following rule laid down in Daśarūpaka :—

नीरसोऽनुचितस्तत्र संसूच्यो वस्तुविस्तरः.

On the other hand, Śṛṅgāra and Hāsya being twin sisters, any picture of the Hāsya, as has been made in Śekharaka's scene is bound to increase the effect of Śṛṅgāra which is the main Rasa in the

Third Act, which would have been missed if the scene were not part and parcel of the Act itself.

The stage-direction for Vidūṣaka's bathing in the Third Act is also likely to be called in question on the ground that it is prohibited on the stage by the following rule of dramaturgy laid down by Daśarūpaka :—

दूराह्वानं वधं युद्धं राज्यदेशादिविप्लवम् ।
संरोधं भोजनं स्नानं सुरतं चानुलेपनम ॥
अम्बरग्रहणादीनि प्रत्यक्षाणि न निर्दिशेत् ॥

The short answer to the objection is that a poet's genius will cover a hundred faults, as has been so ably expressed in the Dhvanyāloka :—

अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः ।
यस्त्वशक्तिकृतस्तस्य स झटित्यवभासते ॥

In the matter of the readings of the text, I have entirely followed the Trivandrum Sanskrit Series edition of the play. In the course of my translation of this play, I had the benefit of several suggestions and criticisms from Vidwan Govinda Pisharody, Malayalam Pandit of the Presidency College, Madras to whom my thanks are due.

C. SANKARA RAMA SASTRI,
General Editor,
Sri Balamanorama Series

Mylapore, Madras.
15th June, 1932.

ARGUMENT OF THE PLAY

Act I. Fond of serving his parents and indifferent to the pleasures of kingship, the Vidyādhara Prince Jīmūtavāhana, finds out a site for the hermitage for his aged parents at the Malaya mountain at the bidding of his father. Remaining there, he hears a song and proceeds along with Vidūṣaka, following the song and comes to the temple of Gāurī where the Siddha Princess Malayavatī, is playing on the lute. Hidden by a thicket, he overhears her conversation with the servant-maid in the course of which it transpires that she dreamt a dream on the previous night that the future Vidyādhara Emperor will take her hand by the grace of the Goddess. At this stage the Hero appears before the Heroine who on seeing him feels shy through love. Then a hermit enters and takes the Heroine to her home as required by her parents. The Vidūṣaka feels joyous on seeing his friend smitten by love.

Act II. Deeply affected by love for the Hero, Malayavatī walks to the sandal-bower where the cooling materials applied to her body by the maid-servant only serve to increase the heat of her

torment. Equally oppressed by love for the Heroine, Jīmūtavāhana walks to the same sandal-bower along with Vidūṣaka in order to relieve himself of the agony due to love. The Heroine and the servant-maid, hidden under a bush, overhear the conversation between the Hero and his friend, in which the Hero narrates that he saw in dream his sweetheart weeping in indignation towards him. The Hero writes the picture of his sweetheart on the Moon-slab in the bower and amuses himself by the sight of the same. At this stage the Siddha Prince Mitrāvasu enters and tells the Hero that he is to give his sister Malayavatī in marriage to him as directed by his father. Ignorant of the identity of Malayavatī, the Hero declines the offer, stating that his heart is pledged to another lady. Mitrāvasu, however, goes out to consult the Hero's parents at the suggestion of Vidūṣaka. This is too trying an ordeal for the Heroine, and she attempts to commit suicide by hanging herself on a tree. The servant-maid raises an alarm, and the Hero runs to the rescue of the Heroine and takes her by the hand.

The Heroine learns that the sweetheart written by the Hero on the Moon-slab was no other than herself and takes consolation. The Gāndharva marriage is thus brought about between the Hero and the Heroine. The servant-maid enters and

announces that Jīmūtavāhana's parents have consented to the alliance and the marriage is to be celebrated that very day, and takes the Heroine for her bath. The Hero and Vidūṣaka also walk out for their bath.

Act III. After a comic scene setting out the jubilation of a drunken Viṭa on the happy occasion of the Hero's wedlock, the Hero is seen to walk in the park with his newly married wife and expatiate on her beauty. The servant-maid of the Heroine blackens the face of Vidūṣaka with Tamala juice. The arrival of Prince Mitrāvasu marks the exit of the Heroine with her servant-maid. Mitrāvasu informs the Hero of the seizure of his kingdom by Mataṅga. But the Hero accepts the news gladly, and he even declines the offer of Mitrāvasu for crushing his enemy.

Act IV. The Hero has a stroll along with Mitrāvasu to the sea-shore where he witnesses huge heaps of bones of snakes devoured by Garuḍa. Mitrāvasu is called away by his father. The serpent Śaṅkhacūḍa comes to the slaughter-slab as food for Garuda at the bidding of Vāsuki, that day being his turn. Moved by pity, the Hero resolves to offer himself as food for Garuḍa in the place of Śaṅkhacūḍa. But the latter would not allow it. However when Śaṅkhacūḍa goes out to worship

God before offering himself as food, Jīmūtavāhana covers himself with a pair of red garments (which is the victim's sign) accidentally got from his mother-in-law through the chamberlain on the occasion of the honey-moon and gets up the slaughter slab. Garuḍa comes in hot haste, and seizes him when flowers fall from the sky and drums deat.

Act V. Garuḍa takes hold of the Hero for his prey and carries him to the hillock near by. While so doing, the Hero's crest-jewel with wet flesh and hair clinging to it falls at the feet of his father at the hermitage which makes him gravely anxious about his son. Śaṅkhacūḍa on coming back to the slaughter-slab, finds the Hero already carried away by Garuḍa, and follows the track of his blood. On the way he meets Jīmūtaketu and divulges the sad news to him. The Hero's parents and wife resolve to put an end to their lives by entering the fire. But at the suggestion of Śaṅkhacūḍa they agree to follow him but with the sacrificial fire in hand. Śaṅkhacūḍa goes in advance and meets Garuḍa with the Hero lain in front. Garuḍa is puzzled at the courage and cheerfulness of the Hero, and stops from eating. The Hero urges him on to eat and satisfy his appetite. Garuḍa is apprised of Śaṅkhacūḍa's presence and of the fact that he has

been sent by Vāsuki for his food. The Hero's parents and wife also come to the place. Garuḍa is awfully ashamed of his act, and resolves to enter the sub-marine fire. The Hero dissuades him from so doing and advises him that the right method of expiation lies in desisting from slaughter of animals in future. Penitence dawns upon Garuḍa, and he takes a vow accordingly. The Hero feels pangs of death which makes all lament With a view to restore the Hero to life, Garuḍa flies up to the heavens and sends forth a shower of ambrosia. By that time Gāurī, the favourite Goddess of Malayavatī appears and sprinkles water over the Hero who comes back to life unhurt. The shower of ambrosia from above restores the innumerable deceased snakes to life, and the joy of serpents in thus accomplished. The Hero is anointed with holy waters by Gāuri and is crowned by her as the Emperor of the Vidyādharas.

DRAMATIS PERSONÆ

सूत्रधारः

नटी

नायकः (जीमूतवाहनः)

विदूषकः (आत्रेयः)

नायिका (मलयवती)

चतुरिका (चेटी)

तापसः (शाण्डिल्यः)

मनोहरिका (चेटी)

मित्रावसुः

विटः (शेखरकः)

चेटः (विटस्य भृत्यः)

नवमालिका (चेटी)

काञ्चुकीयः

प्रतीहारः (सुनन्दः)

वृद्धा (शङ्खचूडमाता)

शङ्खचूडः

किंकरः (वासुकिभृत्यः)

गरुडः

जीमूतकेतुः

देवी (जीमूतकेतुपत्नी)

गौरी

॥ श्रीः ॥

श्रीहर्षदेवप्रणीतं

॥ नागानन्दम् ॥

प्रथमोऽङ्कः ।

ध्यानव्याजमुपेत्य चिन्तयसि कामुन्मील्य चक्षुः क्षणं
पश्यानङ्गशरातुरं जनमिमं त्रातापि नो रक्षसि ।
मिथ्याकारुणिकोऽसि निर्घृणतरस्त्वत्तः कुतोऽन्यः पुमान्
सेर्ष्यं मारवधूभिरित्यभिहितो बोधौ जिनः पातु वः ॥१॥

ACT THE FIRST.

WHICH LADY are yon thinking of under the pretext of meditation? Open your eye for a moment, and look at us who are worried by the arrows of Love. A protector as you are, you do not protect us. You are falsely reputed to be compassionate. How is any other man more merciless than you? Being thus addressed in jealousy by Māra's daughters, may JINA in his state of realisation protect you. (1)

अपिच—

कामेनाकृष्य चापं हतपटुपटहावल्गिभिर्मारवीरै-
र्भ्रूभङ्गोत्कम्पजृम्भास्मितललितवता दिव्यनारीजनेन ।
सिद्धैः प्रह्वोत्तमाङ्गैः पुलकितवपुषा विस्मयाद् वासवेन
ध्यायन् बोधेरवाप्तावचलित इति वः पातु दृष्टो मुनीन्द्रः ॥२॥

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्रधारः—अद्याहमिन्द्रोत्सवे सबहुमानमाहूय नानादिग्देशागतेन राज्ञः श्रीहर्षदेवस्य पादपद्मोपजीविना राजसमूहेनोक्तः । यथा—

Besides,

May the Lord of sages protect you, who when meditating was seen with wonder, unshaken in the enjoyment of realisation—by Cupid with his drawn bow, by the soldiers of Cupid dancing while beating their loud drums, by the celestial damsels knitting their brows and possessed of tremour, yawning, smile and elegant movements of limbs, by seers with heads bent low, and by Indra with his body covered all over with hair standing on their legs. (2)

(*At the end of the Stage-benediction, enter* the Stage-director)

Stage-director. To-day, in the festival held in honour of Indra, I was cordially invited and told by the assemblage of princes who had arrived from the several countries in different quarters and who are dependent on the lotus-like feet of King Śrī

यत् तदस्मत्स्वामिना श्रीहर्षदेवेनापूर्ववस्तुरचनालंकृतं विद्याधर-जातकप्रतिबद्धं नागानन्दं नाम नाटकं कृतमित्यस्माभिः श्रोत्रपरम्परया श्रुतं, न प्रयोगतो दृष्टम्। तत्तस्यैव राज्ञो बहुमानादस्मासु चानुग्रहबुद्धया यथावत् प्रयोगेनाद्य त्वया नाटयितव्यमिति। तद् यावदिदानीं नेपथ्यरचनां कृत्वा यथाभिलषितं संपादयामि। आवर्जितानि च सामाजिकजनमनांसीति मे निश्चयः। कुतः—

श्रीहर्षो निपुणः कविः परिषदप्येषा गुणग्राहिणी
लोके हारि च बोधिसत्त्वचरितं नाट्ये च दक्षा वयम्।
वस्त्वेकैकमपीह वाञ्छितफलप्राप्तेः पदं किं पुन-
र्मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ॥३॥

Harṣadeva thus:—'It has been heard by us by hearsay that a drama has been composed by our lord Śrī Harṣadeva named Nāgānanda which is adorned by the description of a novel plot and which relates to the story known as Vidyādharajataka. But it has not been seen represented on the stage. Therefore out of regard for that king and with a view to obliging us, let it be duly represented by you on the stage.' Therefore I shall just make arrangements for dressing, and do as desired. I am sure that the minds of the audience are already won over; because—

Śrī Harṣa is a clever poet, and this assembly can appreciate merits. The story of Bodhisattva is popular in the whole world, and we are experts on the

तद् यावद् गृहिणीमाहूय सङ्गीतकमनुतिष्ठामि ।

(परिक्रम्य नेपथ्याभिमुखमवलोक्य)

द्विजपरिजनबन्धुहिते मद्भवनतटाकहंसि मृदुशीले ।
परपुरुषचन्द्रकमलिन्यार्ये कार्यादितस्तावत् ॥ ४ ॥

(प्रविश्य सास्रा)

नटी—अय्य इयह्मि । आर्य इयमस्मि ।

सूत्रधारः—(विलोक्य) आर्ये नागानन्दे नाटयितव्ये किमिदमकारणमेव रुद्यते ।

---

stage. Each one of the objects here is the cause of achieving the desired end. What then, when to my great fortune all good things have combined! (3)

Therefore I shall just call my housewife and set the music into play.

(Walking around and looking towards the dressing-room)

Oh lady, good alike to Brahmins, servants and kinsmen, she-swan of the lake in the form of my home, Oh lady of gentle manners, lotus-bed to the moon in the shape of other males, here please on business. (4)

(Enter weeping)

Actress. Sir, here I am.

Stage-director. *(Looking)* Madam, when Nāgānanda is to be put on boards, why do you weep without reason ?

नटी—अय्य कहं ण रोदिस्सं । जदा तादो अज्जुआ अ थविरभावजादणिव्वेदाओ कुडुम्बभारुव्वहणजोग्गो दाणिं तुवं ति हिअए आरोविअ तवोवणं गदाओ ।

आर्य कथं न रोदिष्यामि । यदा तातोऽज्जुका च स्थविरभावजातनिर्वेदौ कुटुम्बभारोद्वहनयोग्य इदानीं त्वमिति हृदय आरोप्य तपोवनं गतौ ।

सूत्रधारः—कथं मामपि परित्यज्य वनं प्रयातौ पितरौ । (विचिन्त्य) तत् किमिदानीं युज्यते । अथवा, कथमहं गुरुचरणपरिचर्यासुखं परित्यज्य गृहे तिष्ठामि । कुतः,

पित्रोर्विधातुं शुश्रूषां त्यक्त्वैश्वर्यं क्रमागतम्
वनं याम्यहमप्येष यथा जीमूतवाहनः ॥ ५ ॥

(निष्क्रान्तौ ।)

आमुखम् ।

Actress. Sir, how shall I not weep when the sire and madam, out of disgust for the world due to old age, have gone to the penance-grove, having conceived in their mind that you are now fit to bear the burden of the household ?

Stage-director. How have my parents gone to the forest, having forsaken even me ? (*Reflecting*) Then what is proper now ? Or, how shall I remain at home leaving off the joy of serving the feet of my parents ? Because,

For doing service to my parents, after giving up my hereditary wealth, I shall also go to the

(ततः प्रविशति नायको विदूषकश्च।)

नायकः—

रागस्यास्पदमित्यवैमि नहि मे ध्वंसीति न प्रत्ययः
कृत्याकृत्यविचारणासु विमुखं को वा न वेत्ति क्षितौ।
एवं निन्द्यमपीदमिन्द्रियवशं प्रीत्यै भवेद् यौवनं
भक्त्या याति यदीत्थमेव पितरौ शुश्रूषमाणस्य मे॥६॥

विदूषकः—(सरोषम्) भो वअस्स ण णिव्विण्णो एव तुवं एत्तिअं कालं एदाणं जीवन्तमुदाणं वुड्ढाणं किदे ईदिसं वणवासदुक्खं अणुहवन्तो। ता पसीद। दाणिं पि दाव गुरुजणसुस्सूसाणिब्बन्धादो णिव्वत्तिअ इच्छापरिभोअरमणिज्जं रज्जसोक्खं अणुभवीअदु।

---

woods just as this Jīmūtavāhana. (5)

(Exeunt)

PRELUDE

(Enter the Hero *and* Vidūṣaka*)*

Hero. I know this (youth) to be the producer of lust, nor do I not know that it is transient. Who on earth does not know this to obstruct the discrimination between good and bad ? And, it is under the control of organs. Thus reprehensible though it be, this youthfulness will contribute to my pleasure if only it passes thus while I am serving my parents with devotion. (6)

(सरोषम्) भो वयस्य न निर्विण्ण एव त्वमेतावन्तं कालमेतयोर्जीवन्मृतयोर्वृद्धयोः कृत ईदृशं वनवासदुःखमनुभवन्। तत् प्रसीद। इदानीमपि तावद् गुरुजनशुश्रूषानिर्बन्धान्निवृत्येच्छापरिभोगरमणीयं राज्यसौख्यमनुभूयताम्।

नायकः—सखे न सम्यगभिहितम्। कुतः,

तिष्ठन् भाति पितुः पुरो भुवि यथा सिंहासने किं तथा
किं संवाहयतः सुखानि चरणौ तातस्य किं राजकम्।
किं भुक्ते भुवनत्रये धृतिरसौ भुक्तोज्झिते या गुरो-
रायासः खलु राज्यमुज्झितगुरोस्तेनास्ति कश्चिद् गुणः॥७॥

Vidūṣaka. *(Angrily)* Friend, you are yet not disgusted with undergoing this kind of misery due to life in the forest all this time for the sake of this aged pair, dead though breathing. Therefore be pleased. At least now turn back from persistence in serving your parents, and enjoy the charming happiness of kingship which will yield pleasures to your heart's content.

Hero. Friend, not well said. Because,

Does a man shine so much on the throne as when standing on the Earth in front of his father? Are the pleasures of a man who is shampooing the feet of his father available to one who is lording over a number of kings? Will there be the same satisfaction while enjoying the three worlds as the one which a man has when eating the remnants of food left by his father? Kingship is indeed a worry

विदूषकः—(आत्मगतम्।) अहो से गुरुजणसुस्सूसाणुराओ। (विचिन्त्य) भोदु, एव्वं दाव भणिस्सं। (प्रकाशम्) भो वअस्स ण खु अहं केवलं रज्जसोक्खं उद्दिसिअ एव्वं भणामि। अण्णं पि दे करणिज्जं अत्थि एव्व।

(आत्मगतम्) अहो अस्य गुरुजनशुश्रूषानुरागः। (विचिन्त्य) भवतु एवं तावद्भणिष्यामि। (प्रकाशम्) भो वयस्य न खल्वहं केवलं राज्यसौख्यमुद्दिश्यैवं भणामि। अन्यदपि ते करणीयमस्त्येव।

नायकः—वयस्य ननु कृतमेव करणीयम्। पश्य,

न्याय्ये वर्त्मनि योजिताः प्रकृतयः सन्तः सुखं स्थापिता
नीतो बन्धुजनस्तथात्मसमतां राज्येऽपि रक्षा कृता।

---

to one who has left off his parents. Is there any merit in it ? (7)

Vidūṣaka. *(To himself)* Ah! What a zeal has he for serving his parents! *(Reflecting)* Let it be. I shall tell him thus. *(Aloud)* Oh friend, I am of course not saying this simply with a view to the pleasures of kingship. There is something more to be done by you.

Hero. Friend, I have already done what I should do. See—

The ministers have been brought up in the virtuous path. The learned have been placed in affluence. Likewise the kinsfolk have been placed on a par with myself, and the kingdom has been

दत्तो दत्तमनोरथाधिकफलः कल्पद्रुमोऽप्यर्थिने
किं कर्तव्यमतः परं कथय वा यत् ते स्थितं चेतसि ॥८॥

विदूषकः—भो वअस्स अच्चन्तसाहसिओ मदङ्गदेवहदओ दे पडिवक्खो । तस्सिं च समासण्णट्ठिदे पहाणामच्चसमहिट्ठिदं पि ण तुए विणा रज्जं सुत्थिदं ति मे पडिभादि ।

भो वयस्य अत्यन्तसाहसिको मतङ्गदेवहतकस्ते प्रतिपक्षः । तस्मिंश्च समासन्नस्थिते प्रधानामात्यसमधिष्ठितमपि न त्वया विना राज्यं सुस्थितमिति मे प्रतिभाति ।

नायकः—किं मतङ्गो राज्यं ग्रहीष्यतीत्याशङ्कसे । यद्येवं ततः किम् । स्वशरीरतः प्रभृति परार्थमेव सर्वं मया परिपाल्यते । यत् तु स्वयं

---

placed under protection. Even the Kalpaka tree which gives more than what is desired has been given away to the man who prayed for it. What more remains to be done ? Or, tell what is in your mind ? (8)

Vidūṣaka. Oh friend, the wretched king Mataṅga, a most daring person, is your foe. It strikes me that when he is near, the kingdom is not safe without you, though looked after by the Prime Minister.

Hero. Do you apprehend that Mataṅga will capture the kingdom ? Even then what does it matter ? Everything including my own body is protected by me for the sake of others. Whatever is

न दीयते, तत् तातानुरोधात् । तत् किमनेनावस्तुना चिन्तितेन । वरं ताताज्ञैवानुष्ठिता । आज्ञापितोऽस्मि तातेन । यथा—वत्स जीमूतवाहन बहुदिवसपरिभोगेन दूरीकृतं समित्कुशकुसुमम् । उपयुक्तमूलफलकन्दनीवारप्रायमिदं स्थानं वर्तते । तन्मलयपर्वतं गत्वा निवासयोग्यमाश्रमपदं निरूपयेति । तद्यावन्मलयमेव गच्छावः ।

(उभौ परिक्रामतः ।)

विदूषकः—भो वअस्स पेक्ख पेक्ख । एसो खु सरसघणसिणिद्धचन्दणवणुच्छङ्गपरिमिळणळग्गबहळपरिमळो विसमतडपडणजज्जरिज्जन्तणिज्झरुच्छळिअसिसिरसीअरासारवाही पढमसङ्गमुक्कण्ठिअपिआकण्ठग्गहो विअ मग्गपरिस्समं अवणअन्तो रोमञ्चेदि पिअवअस्सं मळअमारुओ ।

---

not given away by myself is withheld out of respect for the wishes of my father. Therefore why think you of this empty thing ? Better if my father's command alone were carried out. I have been thus commanded by my father—'Dear son Jīmūtavāhana, owing to long occupation of this place, the Samits, Kuśa grass and flowers have become too remote. This place has become practically destitute of roots, fruits, bulbous roots and grain owing to user. Therefore go to the Malaya mountain, and find out a site for our hermitage fit for occupation.' Hence let us both go to the Malaya.

(Both walk about)

Vidūṣaka. Oh friend, see, see. This zephyr

भो वयस्य पश्य पश्य । एष खलु सरसघनस्निग्धचन्दनवनोत्सङ्गपरिमिलनलब्धबहलपरिमलः विषमतटपतनजर्जरीक्रियमाणनिर्झरोच्छलितशिशिरशीकरासारवाही प्रथमसङ्गमोत्कण्ठितप्रियाकण्ठग्रह इव मार्गपरिश्रममपनयन् रोमाञ्चयति प्रियवयस्यं मलयमारुतः ।

नायकः–(विलोक्य) अये कथं प्राप्ता एव मलयपर्वतम् । (सर्वतो दत्तदृष्टिः) अहो रामणीयकमस्य । तथाहि—

माद्यद्दिग्गजगण्डभित्तिकषणैर्भग्नस्रवच्चन्दनः
क्रन्दत्कन्दरगह्वरो जलनिधेरास्फालितो वीचिभिः ।
पादालक्तकरक्तमौक्तिकशिलः सिद्धाङ्गनानां गतैः
सेव्योऽयं मलयाचलः किमपि मे चेतः करोत्युत्सुकम् ॥९॥

---

of Mount Malaya, gaining excessive fragrance by coming into contact with forests of sandal trees which are juicy, dense and glossy, wafting chill sprays of water risen from mountain-torrents which get shattered by dashing against rugged banks makes your hair stand on their ends, relieving you of the fatigue of journey just as the eager embrace of a beloved in the first union.

Hero. *(Looking)* Oh! We have actually reached Mount Malaya. *(Looking all round)* Oh, how charming is this! Accordingly,

This Malaya mountain which abounds in sandal trees crushed and flowing with juice as a result of the rubbings of the wall-like cheeks of the infatuated elephants in guard of the extremities,—which, being

तदेवारुह्य निवासयोग्यमाश्रमं निरूपयावः ।

(आरोहणं नाटयतः ।)

नायकः—(निमित्तं सूचयन् ।) सखे ।

स्पन्दते दक्षिणं चक्षुः फलकाङ्क्षा न मे क्वचित् ।
न च मिथ्या मुनिवचः कथयिष्यति किंन्विदम् ॥ १० ॥

विदूषकः—भो वअस्स आसण्णं दे पिअं णिवेदेदि ।

भो वयस्य आसन्नं ते प्रियं निवेदयति ।

नायकः—एवं नाम, यथा भवान् ब्रवीति ।

विदूषकः—(सहर्षम्) भो वअस्स एदं खु सविसेसघणसिणिद्धपाद-

---

lashed against by the waves of the Ocean, pretends to weep aloud by the echoing hollows of caves,—which by the frequent walk of the Siddha damsels has its pearl-slabs reddened by the red lac of their feet—and which is a suitable resort for all, somehow makes my mind eager. (9)

Hence come. Let us climb up, and look for a hermitage suitable for habitation.

(Both gesticulate climbing)

Hero. *(Feeling an auspicious sign)* Friend,

My right eye throbs, but I have no desire for anything, nor will the sayings of sages become untrue. What does this indicate ? (10)

Vidūṣaka. Friend, it foretells some good thing for you in the near future.

Hero. Be it so, just as you say.

वोवसोहिदं सुरभिहविग्गंधगब्भिणुद्दामधूमणिग्गमं अणुव्विग्गमग्ग-सुहणिसण्णसावअगणं तवोवणं विअ लक्खीअदि ।

(सहर्षम्) भो वयस्य एतत् खलु सविशेषघनस्निग्धपादपोपशोभितं सुरभिहविर्गन्धगर्भितोद्दामधूमनिर्गमम् अनुद्विग्नमार्गसुखनिषण्णश्वापदगणं तपोवनमिव लक्ष्यते ।

नायकः—सखे सम्यगुपलक्षितम् । तपोवनमेवैतत् । कुतः,

वासोऽर्थं दययैव नातिपृथवः कृत्तास्तरूणां त्वचो
भग्नालक्ष्यजरत्कमण्डलु नभःस्वच्छं पयो नैर्झरम् ।
दृश्यन्ते त्रुटितोज्झिताश्च वटुभिर्मौञ्ज्यः क्वचिन्मेखला
नित्याकर्णनया शुकेन च पदं साम्नामिदं पठ्यते ॥११॥

Vidūṣaka. *(Cheerfully)* Oh friend, this seems to be a penance-grove charming through the peculiarly dense and glossy trees, and with huge columns of smoke pregnant with the fragrance of the sweet-smelling materials offered in the fire, where wild animals loiter in ease on the roads without fear.

Hero. Friend, you have rightly observed. In fact this is a penance-grove. For—

Barks of trees have been cut off for clothing, but not big ones out of compassion. The water of rivulets which is clear like the sky contains broken and worn out Kamaṇḍalus. In some places are seen the girdles made of Munja grass broken and abandoned by the boy-pupils; and owing to constant hearing, the words of the Sāma Veda are repeated by the parrot. (11)

तदेहि । प्रविश्यावलोकयावः ।

(प्रवेशनं नाटयतः)

नायकः—(सर्वतो विलोक्य) अहोतुखलु मुदितमुनिजनप्रविचार्यमाण-संदिग्धवेदवाक्यविस्तरस्य पठद्वटुजनाच्छिद्यमानार्द्रसमिधः तापस-कुमारिकापूर्यमाणबालवृक्षकालवालस्य प्रशान्तरम्यता तपोवनस्य । इह हि,

मधुरमिव वदन्ति स्वागतं भृङ्गशब्दै-
नतिमिव फलनम्रैः कुर्वतेऽमी शिरोभिः ।
मम ददत इवार्घ्यं पुष्पवृष्टीः किरन्तः
कथमतिथिसपर्यां शिक्षिताः शाखिनोऽपि ॥ १२ ॥

Therefore come. Let us enter and see.

(Both make a show of entering)

Hero. *(Looking around)* Oh, how sublime and beautiful is the penance-grove where the doubtful Vedic texts are being discussed by sages imbued with contentment, where Samits are being cut by pupils while committing to memory and where the basins at the foot of plants are being filled with water by the young maidens of sages. And here—

These trees seem to address sweet words of welcome to me through the humming of bees. They seem to offer salutation with their heads bent under the weight of their fruits, and by throwing showers of flowers they seem to offer Arghya to me.

तन्निवासयोग्यं तपोवनम् । मन्ये भविष्यतीह निवसतामस्माकं निर्वृतिः ।

विदूषकः—भो वअस्स किंणुखु एदे ईसिवळिअकन्धरा णिच्चळमुहोसरंतदरदळिअदब्भगब्भकबळा समुण्णामिअदिण्णेक्ककण्णा णिमीळिदळोअणा आअण्णअंतो विअ हरिणा ळक्खिअंति ।

भो वयस्य किंनुखल्वेते ईषद्वलितकन्धराः निश्चलमुखापसरद्दरदलितदर्भगर्भकबलाः समुन्नमितदत्तैककर्णाः निमीलितलोचना आकर्णयन्त इव हरिणा लक्ष्यन्ते ।

नायकः—(कर्णं दत्त्वा) सखे सम्यगुपलक्षितं भवता । तथाहि—

स्थानप्राप्त्या दधानं प्रकटितगमकां मन्द्रतारव्यवस्थां
निर्ह्रादिन्या विपञ्च्या मिलितमलिरुतेनेव तन्त्रीस्वनेन ।

Have even the trees here been taught the reception of guests? (12)

Therefore, this is a penance-grove fit for residence. I think we shall be happy by residing here.

Vidūṣaka. Oh friend, how is it these deer appear to be listening—with necks slightly bent back and with morsels of half-cut darbha grass dropping down from open mouths kept steady, having raised and lent one of their ears and having closed their eyes?

Hero. (*Lending his ear*) Friend, you have observed rightly. Accordingly,

These deer with their bodies turned in a curve, after stopping the noise of grinding the morsels of grass standing between their teeth, listen to a song

एते दन्तान्तरालस्थिततृणकवलच्छेदशब्दं नियम्य
व्याजिह्माङ्गाः कुरङ्गाः स्फुटललितपदं गीतमाकर्णयन्ति॥१३॥

विदूषकः—भो वअस्स को णु खु एसो तवोवणे गाअदि।
भो वयस्य को नु खल्वेष तपोवने गायति।

नायकः—यथा कोमलाङ्गुलितलाभिहन्यमाना नातिस्फुटं क्वणन्ति तन्त्र्यः, काकलीप्रधानं च गीयते, तथा तर्कयामि (अङ्गुल्यग्रेणाग्रतो निर्दिशन्) अस्मिन्नायतने देवतामाराधयन्ती काचिद् दिव्ययोषिदुपवीणयतीति।

विदूषकः—भो वअस्स एदं देवाअदणं पेक्खह्म।

---

whose words are distinct and sweet, which consists of regulated low and high pitches of tone exhibiting varieties of Gamaka by the use of appropriate vocal organs, and which is, as with the humming of bees, in unison with the tone of the strings of a lute emitting sweet notes. (13)

Vidūṣaka. Oh friend, who is he that sings in the penance-grove?

Hero. As the strings being beaten by tender fingers sound feebly, and as it is sung primarily in the Kākalī tone, I infer (*pointing with the tip of his finger in front*) that in this temple a certain divine damsel plays on the lute in propitiation of the Deity.

Vidūṣaka. Friend, let us see this temple.

भो वयस्य एतद् देवतायतनं पश्यावः ।

नायकः—साधूक्तम् । वन्द्याः खलु देवताः । (उपसर्पन् सहसा स्थित्वा) वयस्य कदाचिद् द्रष्टुमनर्होऽयं जनो भविष्यति । तदनेन तावत् तमालगुल्मेनान्तरितौ देवतादर्शनावसरं प्रतिपालयावः । (तथा कुरुतः)

(ततः प्रविशति भूमावुपविष्टा वीणां वादयन्ती मलयवती चेटी च ।)

नायिका—(वीणया सह गायति ।)

उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि ।
अभिवाञ्छितं प्रसिध्यतु भगवति युष्मत्प्रसादेन ॥ १४ ॥

नायकः—(कर्णं दत्त्वा) वयस्य अहो गीतम् । अहो वादित्रम् ।

व्यक्तिर्व्यञ्जनधातुना दशविधेनाप्यत्र लब्धामुना
विस्पष्टो द्रुतमध्यलम्बितपरिच्छिन्नस्त्रिधायं लयः ।

Hero. Well said. Indeed gods are to be worshipped. (*Going near and stopping suddenly*) Friend, perhaps the person here may be one that ought not to be seen. Therefore, remaining hidden by this bush of Tamāla plants, let us await an opportunity to see the God. (*They do so*)

(*Enter* Malayavatī *seated on the earth and playing the lute, and her* Female attendant)

Heroine. (*Sings in harmony with the lute*) Oh Goddess Gāurī, possessed of yellow hue like that of the dust on the filament of a full-blown lotus, may my desire fructify through your grace. (14)

Hero. (*Lending his ear*) Friend, Oh the song! Oh the lute!

गोपुच्छाप्रमुखाः क्रमेण यतयस्तिस्रोऽपि संवादिताः
सत्त्वौघानुगताश्च वाद्यविधयः सम्यक् त्रयो दर्शिताः ॥१५॥

चेटी—भट्टिदारिए चिरं खु वाइदं । ण खु दे परिस्समो अग्गहत्थाणं ।

भर्तृदारिके चिरं खलु वादितम् । न खलु ते परिश्रमोऽग्रहस्तयोः ।

नायिका—हञ्जे चउरिए भअवदीए पुरदो वादयन्तीए कुदो मम परिस्समो ।

हञ्जे चतुरिके भगवत्याः पुरतो वादयन्त्याः कुतो मम परिश्रमः ।

चेटी—(साधिक्षेपम्) भट्टिदारिए णं भणामि किं एदाए णिक्करुणाए पुरदो वाइदेण । एत्तिअं कालं कण्णआजणदुक्खरेहिं णिअमोपवासेहिं आराहअन्तीए ण दे पसादं दंसेदि ।

Here distinctness has been secured by the tenfold play on the lute. The musical time which is of three kinds viz., the quick, the middling and the slow is made clear. The three musical pauses, Gopucchā and others have been harmonised in due course; and the three kinds of playing on musical instruments viz., Sattva, Ogha and Anugata have been well shown. (15)

Maid-servant. Princess, you have long played on the lute. Is there no pain in your fore-arms ?

Heroine. Girl Caturikā, whence is pain to me when I am playing on the instrument in front of the Goddess ?

(साधिक्षेपम्) भर्तृदारिके ननु भणामि किमेतस्या निष्करुणायाः पुरतो वादितेन । इयन्तं कालं कन्यकाजनदुष्करैर्नियमोपवासैराराधयन्त्या न ते प्रसादं दर्शयति ।

विदूषकः—भो वअस्स कण्णआ खु एसा, कीस ण पेक्खह्म ।
भो वयस्य कन्या खल्वेषा, कस्मान्न पश्यावः ।

नायकः—को दोषः । निर्दोषदर्शना हि कन्यकाः । किन्तु कदाचिदस्मान् दृष्ट्वा बालभावसुलभलज्जासाध्वसान्न चिरमिह तिष्ठेत् । तदनेनैव तावल्लताजालान्तरेण पश्यावः ।

(उभौ पश्यतः ।)

विदूषकः—(दृष्ट्वा सविस्मयम्) भो वअस्स पेक्ख पेक्ख । एसा ण केवलं वीणाए कण्णाणं एव्व सुहं उप्पादेदि । इमिणा (वीणा) विण्णाणाणुरूवेण रूवेण अक्खीणं पि सुहं उप्पादेदि । का वुण

Maid-servant. (In a taunting manner) Princess, I do say what is the use of playing on the lute before this merciless Goddess ? She does not show her grace to you though you have been propitiating her all this time by means of austerities and fasts difficult for maidens to observe.

Vidūṣaka. Oh friend, she is a maiden, why not we see her ?

Hero. What harm ? There is no harm in seeing virgins. But perhaps on seeing us she will not remain here long out of shyness and timidity due to young age. Therefore let us see through the interspace in the bush of creepers. *(Both see*

एसा, किं दाव देवी, आदु णाअकण्णआ, आहो विज्जाहरदारिआ, उदाहो सिद्धउळसंभवत्ति ।

(दृष्ट्वा सविस्मयम्) भो वयस्य पश्य पश्य । एषा न केवलं वीणया कर्णयोरेव सुखमुत्पादयति । अनेन (वीणा) विज्ञानानुरूपेण रूपेणाक्ष्णोरपि सुखमुत्पादयति । का पुनरेषा, किं तावत् देवी, अथवा नागकन्यका, आहोस्वित् विद्याधरदारिका, उताहो सिद्धकुलसंभवेति ।

नायकः—(सस्पृहमवलोकयन्) वयस्य केयमिति नावगच्छामि । एतत् पुनरहं जाने ।

स्वर्गस्त्री यदि तत् कृतार्थमभवच्चक्षुःसहस्रं हरे-
र्नागी चेन्न रसातलं शशभृता शून्यं मुखेऽस्याः सति ।
जातिर्नः सकलान्यजातिजयिनी विद्याधरी चेदियं
स्यात्सिद्धान्वयजा यदि त्रिभुवने सिद्धाः प्रसिद्धास्ततः ॥१६॥

Vidūṣaka. *(Seeing, with wonder)* Oh friend, see, see. Not merely does she cause pleasure to the ears by her lute, but she gives pleasure even to the eyes through her beauty which is in keeping with her skill in playing on the lute. Who then is she ? Is she a Goddess or a Nāga maiden or a Vidayādhara girl or a lady born of the race of Siddhas ?

Hero. *(Eagerly looking)* Friend, I have no idea who she is. But this do I know.

If she were a heavenly damsel, the thousand eyes of Indra have realised their purpose. If she were a Nāga maiden, the Nether-world is

विदूषकः—(नायकमवलोक्य सहर्षमात्मगतम्) दिट्ठिआ चिरस्स दाव कालस्स पडिदो खु एसो गोअरे मम्महस्स । (आत्मानं निर्दिश्य) अहवा मम एव्व बह्मणस्स ।

(नायकमवलोक्य सहर्षमात्मगतम्) दिष्ट्या चिरस्य तावत् कालस्य पतितः खल्वेष गोचरे मन्मथस्य । (आत्मानं निर्दिश्य) अथवा ममैव ब्राह्मणस्य ।

चेटी—(सप्रणयम्) भट्टिदारिए णं भणामि किं एदाए णिक्करुणाए पुरदो वाइदेण । (इति वीणामाक्षिपति ।)

(सप्रणयम्) भर्तृदारिके ननु भणामि किमेतस्या निष्करुणायाः पुरतो वादितेन । (इति वीणामाक्षिपति ।)

नायिका—हञ्जे मा मा भअवदिं गौरिं अहिक्खिव । अज्ज किदो मे भअवदीए पसादो ।

---

not destitute of the full Moon so long as there is her face.. If she be a Vidyādhara lady, our community has excelled all other communities. If she is born of the Siddha race, then the Siddhas have become famous in the three worlds. (16)

Vidūṣaka. (*Looking at the Hero, joyfully to himself*) After all, he has fortunately fallen within the sway of Cupid, (*Pointing to himself*) nay, of myself, the Brahmin.

Maid-servant. (*Affectionately*) Princess, I do say, of what use is it to play the lute before this merciless Deity. (*Snatches the lute*)

Heroine. No, girl, don't abuse Goddess Gāurī.

हञ्जे मा मा भगवतीं गौरीमधिक्षिप अद्य कुतो मे भगवत्या प्रसादः।

चेटी—(सहर्षम्) भट्टिदारिए कहेहि दाव कीरिसो सो पसादो।

(सहर्षम्) भर्तृदारिके कथय तावत् कीदृशः स प्रसादः।

नायिका—हञ्जे अज्ज जाणामि सिविणए एव्वं एव्व वीणं वादअन्ती भअवदीए गौरीए भणिदह्मि। वच्छे परितुट्ठह्मि तुह एदिणा वीणाविण्णाणादिसएण इमाए बाळजणदुळ्ळहाए असाहारणाए ममोवरि भत्तीए अ। ता विज्जाहरचक्कवट्टी अइरेण दे पाणिग्गहणं णिव्वट्टइस्सिदित्ति।

हञ्जे अद्य जानामि स्वप्न एवमेव वीणां वादयन्ती भगवत्या गौर्या भणितास्मि। वत्से परितुष्टास्मि तवैतेन वीणाविज्ञानातिशयेन अनया बालजनदुर्लभयासाधारणया ममोपरि भक्त्या च। तद् विद्याधरचक्रवर्ती अचिरेण ते पाणिग्रहणं निर्वर्तयिष्यतीति।

चेटी—भट्टिदारिए जइ एव्वं किस्स सिविणएत्ति भणासि। णं

To-day she has conferred her grace on me.

Maid-servant. *(Joyfully)* Princess, tell me what sort of grace.

Heroine. Girl, tc-day I remember in my dream I was told by Goddess Gāurī while I was playing on the lute like this—'Dear, I am pleased with this proficiency of yours in the lute and this your uncommon devotion in me, rare among young people. Therefore the Emperor of the Vidyādharas will take your hand ere long.'

हिअएच्छिदो एव्व देवीए वरो दिण्णो ।

भर्तृदारिके यद्येवं कस्मात् स्वप्न इति भणसि । ननु हृदयेष्ट एव देव्या वरो दत्तः ।

विदूषकः—भो वअस्स अवसरो खु अह्माणं देवीदंसणस्स । ता एहि पविसह्म । (उपसर्पतः) (अनिच्छन्तमिव नायकं बलादाकृष्य) होदि सच्चं एव्व एसा भणादि वरो एव्व एसो देवीए दिण्णो ।

भो वयस्य अवसरः खल्वस्माकं देवीदर्शनस्य । तदेहि प्रविशावः । (उपसर्पतः) (अनिच्छन्तामिव नायकं बलादाकृष्य) भवति सत्यमेवैषा भणति वर एवैष देव्या दत्तः ।

नायिका—(ससाध्वसमुत्तिष्ठन्ती) हञ्जे को णु खु एसो ।

(ससाध्वसमुत्तिष्ठन्ती) हञ्जे को नु खल्वेषः ।

चेटी—(नायकं निरूप्य) इमाए अण्णोण्णसारिसीए आकिदीए एसो सो भअवदीए पसादत्ति तक्केमि ।

Maid-servant. Princess, if so why do you say dream ? Certainly, the boon (bridegroom) sought for by your heart has been given by the Goddess.

Vidūṣaka. Oh friend, this is the time for us to see the Goddess. Come, therefore. Let us walk in. *(Both go near) (Forcibly dragging the Hero who seems to be reluctant)* Madam, truly does she say this boon (bridegroom) has been given by the Goddess.

Heroine. (Rising perplexed) Girl, who is this ?

Maid-servant. (Looking at the Hero) By

(नायकं निरूप्य) अनयान्योन्यसदृश्याकृत्या एष स भगवत्याः प्रसाद इति तर्कयामि ।

(नायिका सस्पृहं सलज्जं नायकमवलोकयन्ती तिष्ठति ।)

नायकः—

तनुरियं तरलायतलोचने श्वसितकम्पितपीनघनस्तनि ।
श्रममलं तपसैव गता पुनः किमिति संभ्रमकारिणि खिद्यसे ॥१७॥

नायिका—हञ्जे अदिसक्खसेण ण सक्कुणोमि एदस्स संमुहे ठादुं ।
हञ्जे अतिसाध्वसेन न शक्नोम्येतस्य संमुखे स्थातुम् ।
(नायकं तिर्यक्सलज्जं पश्यन्ती किंचित् परावृत्तमुखी तिष्ठति ।)

विदूषकः—भोदि किं एत्थ तुह्माणं तवोवणे ईरिसो आआरो । जेण अदिहिजणो आअदो वाआमत्तेण वि ण संभावणीओ ।

---

this mutually befitting personality, I divine, he is the person got by you through the grace of the Goddess.

(*Heroine stands looking at the Hero longingly and bashfully*)

Hero. O lady possessed of tremulous long eyes, and big, overlapping breasts shaken by hard breathing, this body has undergone much strain by reason of penance alone. Getting perplexed, why do you add to your worry ? (17)

Heroine. Maid, out of extreme fear, I am unable to stand facing him. (*Looking at the Hero askance bashfully, stands turning aside her face a little*)

भवति किमत्र युष्माकं तपोवन ईदृश आचारः । येनातिथिजन आगतो वाङ्मात्रेणापि न संभावनीयः ।

चेटी—(नायिकां दृष्ट्वात्मगतम्) अणुरज्जदी विअ एत्थ एदाए दिट्ठी । ता एव्वं दाव भणिस्सं । (प्रकाशम्) भट्टिदारिए जुत्तं भणादि बह्मणो । उइदो खु दे अदिहिजणसक्कारो । ता कीस एदस्सिं महाणुभावे पडिपत्तिमूढा विअ चिट्ठसि । अहवा चिट्ठ तुवं । अहं एव्व जहाणुरूवं करिस्सं । (नायकमुद्दिश्य) साअदं अय्यस्स । आसणपरिग्गहेण अळंकरोदु इमं पदेसं अय्यो ।

(नायिकां दृष्ट्वात्मगतम्) अनुरज्यतीवात्रैतस्या दृष्टिः । तस्मादेवं तावद्भणिष्यामि । (प्रकाशम्) भर्तृदारिके युक्तं भणति ब्राह्मणः । उचितः खलु तेऽतिथिजनसत्कारः । तत् कस्मादेतस्मिन् महानुभावे प्रतिपत्तिमूढेव तिष्ठसि । अथवा तिष्ठ त्वमहमेव यथानुरूपं करिष्यामि । (नायकमुद्दिश्य) स्वागतमार्यस्य । आसनपरिग्रहणालंकरोत्विमं प्रदेशमार्यः ।

Vidūṣaka. Madam, is this the practice in your penance grove—that a guest arrived should not be respected even by means of words ?

Maid-servant. (Lookig at the Heroine, to herself) Her glance seems to be loving towards him. Therefore I will say thus: *(Aloud)* Princess, what the Brahmin says is right. It is proper for you to respect the guest. Therefore why do you stand confounded towards this great man ? Or stand aside. I shall myself do what is suitable. *(Turning towards the Hero)* Welcome to you, sir. Please adorn this place by sitting thereon.

विदूषकः—भो वअस्स सोभणं एसा भणादि । उपविसिअ मुहुत्तअं विस्समह्म ।

भो वयस्य शोभनमेषा भणति । उपविश्य मुहूर्तं विश्राम्यावः ।

नायकः—युक्तमाह भवान् ।

(उभावुपविशतः ।)

नायिका—(सलज्जम्) हद्धि परिहाससीळे मा एव्वं करेहि । कदाइ को वि तावसो मं पेक्खे । तदो मं अविणीदत्ति संभावइस्सिदि ।

(सलज्जम्) हा धिक् परिहासशीले मैवं कुरु । कदापि कोऽपि तापसो मां पश्येत् । ततो मामविनीतेति संभावयिष्यति ।

(ततः प्रविशति तापसः)

तापसः—आज्ञापितोऽस्मि कुलपतिना कौशिकेन । यथा—वत्स शाण्डिल्य पितुराज्ञया युवराजो मित्रावसुर्भविष्यद्विद्याधरचक्रवर्तिनं कुमारं जीमूतवाहनमिहैव मलयपर्वते क्वापि वर्तमानं भगिन्या मल-

---

Vidūṣaka. Oh friend, what she says is good. Let us sit and take rest for a while.

Hero. What you say is proper. (*Both sit down*)

Heroine. (*Bashfully*) Oh fie, you that are prone to ridicule, don't do like this. Perhaps, some hermit might see me. Then he will take me to be immodest.

(*Enter a* Hermit)

Hermit. I have been directed by Kulapati Kāuśika thus :—'Dear Śāṇḍilya, at the bidding of his father, Prince Mitrāvasu has gone to-day to see Prince Jīmūtavāhana, the future emperor of Vidyā-

यवत्या वरहेतोर्द्रष्टुमद्य गतः । तं च प्रतीक्षमाणायाः कदाचिन्मध्यंदिनसवनविधिरतिक्रामेत् । तदेनामाहूयागच्छेति । तद् यावत् गौरीगृहं गच्छामि । (परिक्रामन् भुवं निरूप्य) अये कस्य पुनरियं पांसुलप्रदेशे प्रकाशितचक्रवर्तिचिह्ना पदपङ्क्तिः । (अग्रतो जीमूतवाहनं निरूप्य) नूनमस्यैवेयं महापुरुषस्य । अपिच,

उष्णीषः स्फुट एष मूर्धनि विभात्यूर्णेयमन्तर्भ्रुवो-
श्चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्धते ।
चक्राङ्कं च यथा करद्वयमिदं मन्ये तथा कोऽप्ययं
नो विद्याधरचक्रवर्तिपदवीमप्राप्य विश्राम्यति ॥ १८ ॥

---

dharas who is somewhere in this Malaya mountain itself as a bridegroom for his sister Malayavatī. Perhaps when she is waiting for him, the mid-day (*lit.* the function of extracting Soma juice during the mid-day) might pass. Therefore take her here.' Hence I will just go to the temple of Gāurī. (*Walking forward, looking at the floor*) Eh! Whose are these footsteps that display signs of an emperor in this dusty place. (*Seeing Jīmūtavāhana in front*) Certainly these are of this great man. And—

Markedly clear is the resting place for the crown on his head, this whirl of hair shines between his brows ; his eye imitates the lotus, his breast vies with Viṣṇu's, and both his hands bear the mark of the discus, as a result of which I think this is some great person who will not rest without reaching the

अथवा कृतं संदेहेन । सुव्यक्तमनेन जीमूतवाहनेन भवितव्यम् । (मलयवतीं निरूप्य) अये इयमपि राजपुत्री । (उभौ विलोक्य) चिरात् खलु युक्तकारी विधिः स्याद्, यदि युगलमिदमन्योन्यानुरूपं घटयेत् । (उपसृत्य नायकमुद्दिश्य) स्वस्ति भवते ।

नायकः—(उत्थाय) भगवन् जीमूतवाहनोऽहमभिवादये ।

(आसनं दातुमिच्छति ।)

तापसः—अलमलमभ्युत्थानेन । ननु सर्वस्याभ्यागतो गुरुरिति भवानेवास्माकं पूज्यः । तद् यथासुखं स्थीयताम् ।

नायकः—बाढम् ।

नायिका—अय्य पणमामि ।

आर्य प्रणमामि ।

---

status of the emperor of Vidyādharas. [18]

Or, enough of doubts. Most certainly he must be Jīmūtavāhana. (*Looking at Malayavatī*) Eh ! Here is the princess also! (*Looking at both*) After all, destiny will be doing the right thing if it unites this couple worthy of each other. (*Approaching and looking towards the Hero*) Hail to you !

Hero. (*Rising*) Your Holiness, I, Jīmūtavāhana, bow to you. (*Desires to give his seat*)

Hermit. Enough, enough of greeting. Indeed you yourself ought to be worshipped by us, because the guest is to be revered by all. Hence be at ease.

Hero. Alright.

Heroine. Sir, I bow.

तापसः—भद्रे अनुरूपभर्तृभागिनी भूयाः । राजपुत्रि, आह त्वां कुलपतिः कौशिकः—अतिक्रामति मध्यन्दिनसवनवेळा । त्वरितमागम्यतामिति ।

नायिका—जं गुरू आणवेदि । यद् गुरुराज्ञापयति ।

(उत्थाय निःश्वस्य सलज्जं सानुरागं च नायकं पश्यन्ती तापससहिता निष्क्रान्ता नायिका चेटी च ।)

नायकः—(सोत्कण्ठं निःश्वस्य नायिकां गच्छन्तीं पश्यन्)

अनया जघनाभोगभरमन्थरयानया ।
अन्यतोऽपि व्रजन्त्या मे हृदये निहितं पदम् ॥ १९ ॥

विदूषकः—दिट्ठं जं पेक्खिदव्वं । दाणिं मज्झण्णसूरसंदावविअणिओ विअ मे जठरग्गी दमदमायदि । ता णिक्कमह्य । जेण अदिही भविअ मुणिजणसआसादो ळद्धेहिं कंदमूळफळेहिं पि दाव पाण-

---

Hermit. Virtuous girl, may you get a suitable husband. Princess, Kulapati Kāuśika tells you,—'The time for the mid-day sacrifice passes. Come quickly.'

Heroine. As the preceptor commands.

(Getting up, heaving, and looking at the Hero bashfully and lovingly, Exit along with the Hermit the Heroine *as also* the Servant-maid)

Hero. (*Heaving and anxiously seeing the Heroine going*) Though with her gait, slow by reason of the weight of her hip, she goes elsewhere, her foot has been set in my heart. (19)

धारणं करिस्सं ।

इष्टं यत् प्रेक्षितव्यम् । इदानीं मध्याह्नसूर्यसंतापद्विगुणित इव मे जठराग्निर्दमद्मायति । तन्निष्क्रामावः । येनातिथिर्भूत्वा मुनिजनसकाशाल्लब्धैः कन्दमूलफलैरपि तावत् प्राणधारणं करिष्यामि ।

नायकः—(ऊर्ध्वमवलोक्य) अये मध्यमध्यास्ते नभस्तलस्य भगवान् सहस्रदीधितिः । तथाहि,

तापात्तत्क्षणघृष्टचन्दनरसापाण्डू कपोलौ वहन्
संसक्तैर्निजकर्णतालपवनैः संवीज्यमानाननः ।
संप्रत्येष विशेषसिक्तहृदयो हस्तोज्झितैः शीकरै-
र्गाढायल्लकदुःसहामिव दशां धत्ते गजानां पतिः ॥२०॥

(निष्क्रान्तौ ।)

प्रथमोऽङ्कः ।

Vidūṣaka. What ought to be seen has been seen. Now as though doubled by the heat of the mid-day Sun, the fire in my stomach rebels. Let us therefore go out so that I may pull on my life at least by the bulbous and other roots and fruits obtained from sages by becoming their guest.

Hero. (*Seeing above*) The Lord Sun occupies the middle of the sky. Accordingly—

Bearing his temples white all over with the juice of sandal trees just then rubbed against

अथ द्वितीयोऽङ्कः ।

(ततः प्रविशति चेटी ।)

चेटी—आणत्तह्मि भट्टिदारिआए मळअवदीए—हञ्जे मणोहरिए अज्ज चिराअदि भादुओ मे अय्यमित्तावसू । ता गदुअ जाणाहि किं आअदो ण वेत्ति । (परिक्रामति । नेपथ्याभिमुखमालोक्य) का उण एसा इदो एव्व आअच्छदि । (निरूप्य) कहं चउरिआ ।

आज्ञप्तास्मि भर्तृदारिकया मलयवत्या—हञ्जे मनोहरिके अद्य चिरयति भ्राता मे आर्यमित्रावसुः । तद् गत्वा जानीहि कि-

---

on account of heat, with his face being fanned with free gusts of wind by his own palm-like ears, and with his lower body wholly wet by the water-sprays discharged from his trunk, this lordly elephant now bears, as it were, the unbearable state of a lover's grave anxiety in separation. (20)

(*Exeunt Omnes*)

END OF THE FIRST ACT.

ACT THE SECOND

(*Enter* the Servant-maid)

Maid-servant. I have been ordered by Princess Malayavatī—'Girl, Manoharikā, to-day my brother, the venerable Mitrāvasu delays long. Hence go and

मागतो न वेति । (परिक्रामति । नेपथ्याभिमुखमालोक्य) का पुनरेषा इत एवागच्छति । (निरूप्य) कथं चतुरिका ।

(ततः प्रविशति चतुरिका)

मनोहरिका—(उपसृत्य) हञ्जे चउरिए किंणिमित्तं पुण तुमं एव्वं तुरिअतुरिअं आअच्छसि ।

(उपसृत्य) हञ्जे चतुरिके किन्निमित्तं पुनस्त्वमेवं त्वरितत्वरितमागच्छसि ।

चतुरिका—आणत्ह्मि भट्टिदारिआए मळअवदीए—हञ्जे चउरिए कुसुमावचअपरिस्समणिस्सहं मे सरीरं सरदादवजणिदो विअ सन्दावो अहिअदरं बाहेइ । ता गच्छ तुवं । बाळकदळीपत्तपरिक्खित्ते चन्दणळदाघरए चन्दमणिसिळावळं सज्जीकरेहित्ति । अणुट्ठिअं च मए जहाणत्तं । ता जाव गदुअ भट्टिदारिआए णिवेदेमि ।

आज्ञप्तास्मि भर्तृदारिकया मलयवत्या—हञ्जे चतुरिके कुसुमावचयपरिश्रमनिस्सहं मे शरीरं शरदातपजनित इव सन्तापोऽधिकतरं बाधते । तद्गच्छ त्वम् । बालकदलीपत्रपरिक्षिप्ते

---

find out whether he is come or not. (*Walks forward*) (*Looking towards the dressing-room*) Who is she that comes here ? (*Seeing*) How ! It is Caturikā!

(*Enter* Caturikā)

Manoharikā. (*Drawing near*) Friend Caturikā, for what reason do you come so very quickly ?

Caturikā. I have been ordered by Princess Malayavatī—'Girl Caturikā, it seems the heat, as though of the autumnal Sun, deeply affects my

चन्दनलतागृहे चन्द्रमणिशिलातलं सज्जीकुर्विति। अनुष्ठितं च मया यथाज्ञप्तम्। तद्यावद्गत्वा भर्तृदारिकायै निवेदयामि।

प्रथमा—जइ एव्वं, ता ळहुअं णिवेदेहि। जेण से ताहिं गदाए सन्दावो उवसमं गमिस्सदि।

यद्येवं तल्लघु निवेदय। येनास्यास्तस्मिन् गतायाः सन्ताप उपशमं गमिष्यति।

द्वितीया—(विहस्यात्मगतम्) ण एरिसो सन्दावो एव्वं उवसमं गमिस्सदि, अण्णञ्च विवित्तरमणिज्जं चन्दणळदाघरअं पेक्खन्तीए अहिअदरं भविस्सदित्ति तक्केमि। (प्रकाशम्) ता गच्छ तुवं। अहं पि सज्जं सिळादळं त्ति भट्टिदारिआए णिवेदेमि।

(विहस्यात्मगतम्) नेदृशः संताप एवमुपशमं गमिष्यति, अन्यच्च विविक्तरमणीयं चन्दनलतागृहं पश्यन्त्या अधिकतरं भविष्यतीति तर्कयामि। (प्रकाशम्) तद् गच्छ त्वम्। अहमपि

---

body which does not stand the strain of plucking flowers. Hence go. Make ready the seat of Candrakānta stone in the bower formed by sandal plants surrounded by the leaves of tender plantain trees.' And, I have done as commanded. So I will just go and inform the princess.

First maid. If so, inform her soon so that her heat may cool down when she is there.

Second maid. (*Laughing, to herself*) This sort of heat will not cool down in this way. On the other hand, I think it will increase on her seeing the solitary and pleasant bower of sandals. (*Aloud*)

सज्जं शिलातलमिति भर्तृदारिकायै निवेदयामि ।

(निष्क्रान्ते)

प्रवेशकः ।

(ततः प्रविशति सोत्कण्ठा मलयवती चेटी च ।)

नायिका—(निःश्वस्यात्मगतम्) हिअअ, तह णाम तदा तस्सिं जणे ळज्जाए मं परम्मुहीकरिअ दाणिं अप्पणा तहिं एव्व गअं सित्ति अहो दे अप्पम्भरित्तणं । (प्रकाशम्) हञ्जे, आदेसेहि मे भअवदीए आअदणस्स मग्गं ।

(निःश्वस्यात्मगतम्) हृदय, तथा नाम तदा तस्मिञ्जने लज्जया मां पराङ्मुखीकृत्येदानीमात्मना तस्मिन्नेव गतमसीत्यहो ते आत्मम्भरित्वम् । (प्रकाशम्) हञ्जे, आदिश मे भगवत्या आयतनस्य मार्गम् ।

चेटी—णं चन्दणळदाघरअं भट्टिदारिआ पत्थिदा ।

ननु चन्दनलतागृहं भर्तृदारिका प्रस्थिता ।

Therefore go. I shall also inform the princess that the stone is ready.

(*Exeunt*)

INTERLUDE

(*Enter* Malayavatī *care-worn and* Maid-servant)

Heroine. (*Sighing, to herself*) Oh heart, having then turned me back through shyness from that person in that manner, now you have yourself gone there. Oh! How selfish you are! (*Aloud*) Girl, show me the way to the abode of the Goddess.

Maid-servant. Princess, you started for the bower made of sandal plants.

नायिका—(सलज्जम्) सुट्ठु तुए सुमराविदं । ता एहि । तहिं एव्व गच्छह्म ।

(सलज्जम्) सुष्ठु त्वया स्मारितम् । तदेहि । तत्रैव गच्छावः ।

चेटी— एदु एदु भट्टिदारिआ ।

एत्वेतु भर्तृदारिका (अग्रतो गच्छति ।)

(नायिकाप्यन्यतो गच्छति ।)

चेटी— (पृष्ठतो दृष्ट्वा, आत्मगतं सोद्वेगम्) अहो से सुण्णहिअअत्तणं । कहं तं एव्व देवीए भवणं पत्थिआ । (प्रकाशम्) भट्टिदारिए णं इदो चन्दणलदाघरअं । ता इदो एहि ।

(पृष्ठतो दृष्ट्वा आत्मगतं सोद्वेगम्) अहो अस्याः शून्यहृदयत्वम् । कथं तदेव देव्या भवनं प्रस्थिता । (प्रकाशम्) भर्तृदारिके नन्वितश्चन्दनलतागृहम । तादित एहि ।

(नायिका सविलक्षं सलज्जं च तथा करोति ।)

Heroine. (*Bashfully*) Well have you reminded me. So, come, let us go there only.

Maid-servant. Princess, come, come. (*Goes in front*)

(*The Heroine goes the other way*)

Maid-servant. (*Looking back, to herself, with mental distress*) Oh her absent-mindedness ! How is it that she starts for that self-same abode of the Goddess ? (*Aloud*) Princess, I say, here is the bower of sandal plants. So come hither.

(*The Heroine does so with embarassment and shyness*)

चेटी —भट्टिदारिए एदं चन्दणळदाघरअं । ता पविसिअ चन्दमणिसिळादळे उवविसदु भट्टिदारिआ ।

भर्तृदारिके एतच्चन्दनलतागृहम् । तत् प्रविश्य चन्द्रमणिशिलातले उपविशतु भर्तृदारिका ।

(उभे उपविशतः ।)

नायिका—(निःश्वस्यात्मगतम्) भअवं, कुसुमाउह जेण तुवं रूवसोहाए णिज्जिदो सि, तस्सिं ण किञ्चि तुए किदं । मं पुण अणवरद्धं अबलत्ति करिअ पहरन्तो कहं ण लज्जसि । (आत्मानं निर्दिश्य मदनावस्थां नाटयन्ती प्रकाशम्) हञ्जे कीस उण एदं घणपल्लवणिरुद्धसूरकिरणं तादिसं एव चन्दणळदाघरअं ण मे अज्ज सन्दावदुक्खं अवणेदि ।

(निःश्वस्यात्मगतम्) भगवन् कुसुमायुध येन त्वं रूपशोभया निर्जितोऽसि, तस्मिन् न किञ्चित् त्वया कृतम् । मां पुनरनपराद्धामबलेति कृत्वा प्रहरन् कथं न लज्जसे । (आत्मानं निर्दिश्य मदनावस्थां नाटयन्ती प्रकाशम्) हञ्जे कस्मात् पुनरेतद् घनपल्लु-

---

Maid-servant. Princess, this is the bower of sandal creepers. Hence enter and sit down on the surface of the Candrakānta slab. (*Both sit*)

Heroine. (*Heaving, within*) Oh lord Cupid, nothing has been done by you to the man by whom you have been vanquished in handsomeness. But you strike at my innocent self, because I am of the weaker sex. How are you not ashamed ? (*Pointing to her own person, showing signs of illness due to love, aloud*) Girl, how does this self-

वनिरुद्धसूर्यकिरणं तादृशमेव चन्दनलतागृहं न मेऽद्य संताप-दुःखमपनयति ।

चेटी—(सस्मितं) जाणामि अहं एत्थ कारणं। किन्तु असम्भावणीअं ति भट्टिदारिआ ण तं पडिवज्जदि ।

(सस्मितम्) **जानाम्यहमत्र कारणम्। किन्तु असम्भावनीयमिति भर्तृदारिका न तत् प्रतिपद्यते ।**

नायिका—(आत्मगतम्) आळक्खिदह्मि इमाए। तह वि पुच्छिस्सं दाव। (प्रकाशम्) हञ्जे किं तव एदिणा। कहेहि दाव, किं तं कारणं।

(आत्मगतम्) **आलक्षितास्म्यनया। तथापि प्रक्ष्यामि तावत्।** (प्रकाशम्) **हञ्जे किं तवैतेन। कथय तावत्, किं तत् कारणम्।**

चेटी—एसो दे हिअअच्छिदो वरो। **एष ते हृदयेष्टो वरः।**

नायिका—(सहर्षं ससंभ्रमं चोत्थायाग्रतो द्वित्राणि पदानि गत्वा) कहिं

---

same bower of sandal plants which wards off the Sun's rays by the thickly-grown tender leaves—how does it fail to remove the torment of heat to-day ?

Maid-servant. (*With a smile*) I know the reason for this, princess. But yon wouldn't agree with me, saying that it is improbable.

Heroine. (*Within*) I have been observed by her. However let me ask her. (*Aloud*) Girl, why all this of you ? Just tell me what is that reason.

Maid-servant. It is this boon (bridegroom) sought for by you.

Heroine. (*Rising joyfully and hurriedly, and walking two or three steps forward*) Where,

कहिं सो । कस्मिन् कस्मिन् सः ।

चेटी—(उत्थाय सस्मितम्) भट्टिदारिए को सो । भर्तृदारिके कः सः ।

(नायिका सलज्जमुपविश्याधोमुखी तिष्ठति ।)

चेटी—भट्टिदारिए णं एदह्मि वत्तुकामा । एसो दे हिअअच्छिदो वरो देवीए दिण्णत्ति सिविणए पत्थाविदे जो तक्खणं एव्व विमुक्तकुसुमचावो विअ भअवं मअरद्धओ भट्टिदारिआए दिट्ठो । सो दे इमस्स सन्दावस्स कारणं, जेण एवं सहावसीदळं पि चन्दणळदाधरअं ण दे अज्ज सन्दावदुक्खं अवणेदि ।

भर्तृदारिके नन्वेतदस्मि वक्तुकामा । एष ते हृदयेष्टो वरो देव्या दत्त इति स्वप्ने प्रस्तुते यस्तत्क्षणमेव विमुक्तकुसुमचाप इव भगवान् मकरध्वजो भर्तृदारिकया दृष्टः, स तेऽस्य सन्तापस्य कारणम् । येनैवं स्वभावशीतलमपि चन्दनलतागृहं न तेऽद्य सन्तापदुःखमपनयति ।

---

where is he ?

Maid-servant. (*Standing, with a smile*) Princess, who is he ?

(*The Heroine sitting abashed remains with face turned down*)

Maid-servant. Princess, I was about to say this—'This is the boon (bridegroom) desired by your heart granted by the Goddess'—At the very moment when the dream was thus discussed, a person was seen by you, who appeared as though he were the God of Love without his flower-bow, and Oh princess, he is the cause of this suffering of yours.

नायिका—(चतुरिकाया अलकानि सज्जयन्ती) हञ्जे चउरिआ खु तुवं। किं दे अवरं पच्छादीअदि। ता कहइस्सं।

(चतुरिकाया अलकानि सज्जयन्ती) हञ्जे चतुरिका खलु त्वम्। किं तेऽपरं प्रच्छाद्यते। तत् कथयिष्यामि।

चेटी—भट्टिदारिए णं दाणिं एव कहिदं इमिणा वरालावमत्तजणिदेण सम्भमेण। ता मा सन्तप्प। जइ अहं चउरिआ, तदो सो वि भट्टिदारिअं अपेक्खन्तो ण मुहूत्तअं पि अण्णाहिं अहिरमिस्सदि त्ति एदं पि मए आलक्खिदं एव।

भर्तृदारिके नन्विदानीमेव कथितम् अमुना वरालापमात्रजनितेन संभ्रमेण। तन्मा संतप्यस्व। यद्यहं चतुरिका, ततः सोऽपि भर्तृदारिकामपश्यन् न मुहूर्तमप्यन्यस्मिन्नभिरमते इत्येतदपि मयालक्षितमेव।

नायिका—(सास्रम्) हञ्जे कुदो मे एत्तिआणि भाअधेआणि।

Heroine. (Setting right Caturikā's tresses of hair) You are indeed Caturikā (clever). Why should the rest be concealed from you? I shall therefore tell you.

Maid-servant. Princess, of course it has been already disclosed by this flutter of yours caused by the mere mention of boon (bridegroom). Therefore don't get worried. If I am Caturikā (clever), then it has been noticed by me that he too will not take interest in anything else even for a moment without seeing you.

(सास्रम्) हञ्जे कुतो मे इयन्ति भागधेयानि ।

चेटी—भट्टिदारिए मा एवं भण । किं महुमहणो वच्छत्थलेण लच्छिं अणुव्वहन्तो णिव्वुदो होइ ।

भर्तृदारिके मैवं भण । किं मधुमथनो वक्षःस्थलेन लक्ष्मीमनुद्वहन् निर्वृतो भवति ।

नायिका—किं वा सुअणो पिअं वज्जिअ अण्णं भणिदुं जाणादि । सहि, अदो वि सन्दावो अहिअदरं मं बाहेइ । जं सो महाणुभावो वाआमेत्तएण वि अकिदपडिवत्तिं अदक्खिणत्ति मं सम्भावइस्सदि ।

किं वा सुजनः प्रियं वर्जयित्वान्यद् भणितुं जानाति । सखि अतोऽपि संतापोऽधिकतरं मां बाधते । यत् स महानुभावो वाङ्मात्रेणाप्यकृतप्रतिपत्तिमदक्षिणेति मां संभावयिष्यति ।

(इति रोदिति)

चेटी—भट्टिदारिए मा रोद । (उत्थाय चन्दनपल्लवं गृहीत्वा निष्पीड्य हृदये ददाति ।) णं भणामि मा रोद त्ति । अअं खु थणपट्टदिण्णो

Heroine. (*With tears*) Girl, how will there be such happiness for me ?

Maid-servant. Princess, don't say like this. Does the slayer of Madhu remain happy without bearing Lakṣmī on his chest ?

Heroine. Does a friend know to speak anything but what is pleasing ? Friend, for this reason also the sickness affects me still more—for the reason that that great man might think me to be lacking in courtesy, as I have not received him even by words. (*Weeps*)

घन्दणपल्लवरसो इमेहि अविरळपडन्तेहि अस्सुबिन्दूहि उण्हीकिदो ण दे हिअअसन्दावदुक्खं अवणेदि । (कदलीपत्रमादाय वीजति ।)

भर्तृदारिके मा रुदः । (उत्थाय चन्दनपल्लवं गृहीत्वा निष्पीड्य हृदये ददाति ।) ननु भणामि मा रुद इति । अयं खलु स्तनपट्टद्त्तश्चन्दनपल्लवरसोऽमीभिरविरलपतद्भिरश्रुबिन्दुभिरुष्णीकृतो न ते हृदयसन्तापदुःखमपनयति । (कदलीपत्रमादाय वीजति ।)

नायिका—(हस्तेन निवारयन्ती) सहि मा वीजेहि । उण्हो खु एसो कदळीदळमारुओ ।

(हस्तेन निवारयन्ती) सखि मा वीज । उष्णः खल्वेष कदलीदलमारुतः ।

चेटी—भट्टिदारिए मा इमस्स दोसं करेहि ।

कुणसि घणचन्दणळआपळ्ळवसंसग्गसीदळं पि इमं ।
णीसासेहि तुमं चिअ कदळीदळमारुअं उण्हं ॥ १ ॥

भर्तृदारिके मा अस्य दोषं कुरु ।

Maid-servant. Princess, don't weep. (*Rising, taking the tender leaves of sandal, squeezes their juice over her heart*) I say, don't weep. This juice of the tender leaves of sandal applied to your breasts gets heated by these incessantly falling drops of tears and fails to remove the torture of your heart. (*Taking a plantain leaf, fans*)

Heroine. (*Warding off with her hand*) Friend, don't fan. Hot is the wind of this plantain leaf.

Maid-servant. Princess, don't attribute the fault to this.

करोषि घनचन्दनलतापल्लवसंसर्गशीतलमपीमम् ।
निःश्वासैस्त्वमेव कदलीदलमारुतमुष्णम् ॥

नायिका—सहि अत्थि कोवि इमस्स दुक्खस्स उवसमोवाओ ।
सखि अस्ति कोऽप्यस्य दुःखस्योपशमोपायः ।

चेटी—भट्टिदारिए अत्थि, जदि सो इह आअच्छे ।
भर्तृदारिके अस्ति, यदि स इहागच्छेत् ।

(ततः प्रविशति नायको विदूषकश्च ।)

नायकः—

व्यावृत्त्यैव सितासितेक्षणरुचा तानाश्रमे शाखिनः
कुर्वत्या विटपावसक्तविलसत्कृष्णाजिनौघानिव ।
यद् दृष्टोऽस्मि तया मुनेरपि पुरस्तेनैव मय्याहते
पुष्पेषो भवता मुधैव किमिति क्षिप्यन्त एते शराः॥२॥

Though this wind of the plantain leaf is cool by close contact with the tender leaves of sandal creepers, you yourself make it hot by your breath. (1)

Heroine. Friend, is there a cure for this misery ?

Maid-servant. Princess, there is if he comes here.

(Enter the Hero *and* Vidūṣaka*)*

Hero. Oh Cupid, why are these arrows discharged in vain by you at me when I have been already hit by being seen, despite the presence of the sage, by her who actually turned back, while by the lustre of her white and black glances she made those trees in the hermitage possessed as

विदूषकः—भो वअस्स कहिं खु गअं दे धीरत्तणं ।
भो वयस्य कस्मिन् खलु गतं ते धीरत्वम् ।
नायकः—वयस्य ननु धीर एवास्मि । कुतः,

नीताः किं न निशाः शशाङ्करुचयो नाघ्रातमिन्दीवरं
किं नोन्मीलितमालतीसुरभयः सोढाः प्रदोषानिलाः ।
झङ्कारः कमलाकरे मधुलिहां किं वा मया न श्रुतो
निर्व्याजं विधुरेष्वधीर इति मां केनाभिधत्ते भवान् ॥ ३ ॥

अथवा, न सम्यगहं ब्रवीमि । वयस्यात्रेय,

स्त्रीहृदयेन न सोढाः क्षिप्ताः कुसुमेषवोऽप्यनङ्गेन ।
येनाद्यैव पुरस्तव वदामि धीर इति स कथमहम् ॥ ४ ॥

---

though of heaps of shining skins of black antelopes stuck to their branches ? (2)

Vidūṣaka. Oh friend, where is your courage gone ?

Hero. Friend, I am indeed courageous, for—
Have not the nights lit by the Moon been spent by me, has not the lotus been smelt, have not the evening breezes, fragrant with blooming Mālatī flowers been endured ? Or, has not the hum of bees in the lotus-tank been heard by me ? How then do you describe me among the love-lorn as a coward unless it be in jest ? (3)

Or, I am not right. Friend, Ātreya,

When even the flower-shafts aimed by the bodiless (Cupid) have not now been endured by

विदूषकः—(आत्मगतम्) एवं अहीरत्तणं पडिवज्जन्तेण आचक्खिदो णेण हिअअस्स महन्तो आवेओ । ता एवं आचक्खामि । (प्रकाशम्) भो वअस्स कीस तुवं अज्ज ळहु एव गुरुजणं सुस्सूसिअ इह आअदो ।

(आत्मगतम्) एवमधीरत्वं प्रतिपद्यमानेनाख्यातोऽनेन हृदयस्य महानावेगः। तदेवमाचक्षे । (प्रकाशम्) भो वयस्य कस्मात् त्वमद्य लघ्वेव गुरुजनं शुश्रूषयित्वेहागतः।

नायकः—वयस्य स्थाने खल्वेष प्रश्नः । कस्य वान्यस्यैतत् कथनीयम् । अद्य खलु स्वप्ने जानामि सैव प्रियतमा (अङ्गुल्या निर्दिशन्) अत्र चन्दनलतागृहे चन्द्रकान्तमणिशिलायामुपविष्टा प्रणयकुपिता किमपि मामुपालभमानेव रुदती मया दृष्टा । तदिच्छामि स्वप्रा-

---

me as my mind is attached to a woman, how do I say at the same time in your presence that I am brave ? (4)

Vidūṣaka. (*Within*) By thus owning lack of bravery he has proclaimed the grave anguish of his heart. Hence I shall say thus : (*Aloud*) Oh friend, how have you come here after serving your parents so soon ?

Hero. Friend, proper is this query. To whom else is this to be told ? To-day in the dream that same sweetheart, I remember (*Pointing by the finger*) was seen by me seated on the Candrakānta slab in this sandal-bower and weeping as though complaining of me in an indescribable

नुभूतदयितासमागमरम्येऽस्मिन्नेव प्रदेशे दिवसमतिवाहयितुम् । तदेहि गच्छावः ।

(परिक्रामतः ।)

चेटी—(कर्णं दत्वा ससंभ्रमम) भट्टिदारिए पदसद्दो विअ सुणीअदि।

(कर्णं दत्वा ससंभ्रमम्) भर्तृदारिके पदशब्द इव श्रूयते ।

नायिका—(ससंभ्रममात्मानं पश्यन्ती) हञ्जे मा ईदिसं आआरं पेक्खिअ को वि हिअअं मे तुलीअदु । ता उट्ठेहि । इमिणा रत्तासोअपादवेण ओवारिदाओ पेक्खह्म को एसो त्ति ।

(ससंभ्रममात्मानं पश्यन्ती) हञ्जे मा ईदृशमाकारं प्रेक्ष्य कोऽपि हृदयं मे तुलयतु । तदुत्तिष्ठ । अनेन रक्ताशोकपादपेनापवारिते पश्यावः क एष इति ।

(तथा कुरुतः ।)

विदूषकः—भो वअस्स एदं चन्दणलदाघरअं । ता पविसह्म ।

---

manner out of indignation in a love-quarrel. So I should like to spend the day in this place only, which is pleasant by reason of the interview of my beloved enjoyed in my dream. So, come. We shall go. *(Both walk forward)*

Maid-servant. (Lending her ear, in a hurry) Princess, the sound of footsteps seems to be heard.

Heroine. (Looking at herself, in a hurry) Girl, let not anybody detect my heart by seeing this kind of appearance. Therefore get up. Being concealed by this red Aśoka tree, let us see who he is. *(They do so)*

भो वयस्य एतच्चन्दनलतागृहम् । तत् प्रविशावः ।

(नाट्येन प्रविशतः ।)

नायकः—(प्रविश्य)

चन्दनलतागृहमिदं सचन्द्रमणिशिलमपि प्रियं न मम ।
चन्द्राननया रहितं चन्द्रिकया मुखमिव निशायाः ॥ ५ ॥

चेटी—(नायकं दट्ठूण) भट्टिदारिए दिट्ठिआ वड्ढसि । सो एव्व दे हिअअवल्लहो ।

(नायकं दृष्ट्वा) भर्तृदारिके दिष्ट्या वर्धसे । स एव ते हृदयवल्लभः ।

नायिका—(दट्ठूण सहर्षं ससाध्वसं च ।) हञ्जे इमं पेक्खिअ ण सक्कुणोमि इह अच्चासण्णे ठादुं । कदाइ एसो मं पेक्खे । ता एहि । अण्णदो गच्छह्म ।

(दृष्ट्वा सहर्षं ससाध्वसं च) हञ्जे इमं प्रेक्ष्य न शक्नोमीहात्यासन्ने

Vidūṣaka. Oh friend, this is the sandal-bower. Therefore, let us enter.

(Both enter by a show)

Hero. (Entering) Though provided with a Candrakānta slab, this sandal-bower being destitute of the Moon-faced lady does not please me, just as the nightfall destitute of moon-light. (5)

Maid-servant. (Seeing the Hero) Princess, you are fortunate. He is the very same lover desired by your heart.

Heroine. (Seeing, with joy and fear) Girl, on seeing him I am not able to stand here so near.

स्थातुम्। कदाचिदेष मां पश्येत् । तदेहि । अन्यतो गच्छावः ।
(सोरुकम्पं पदद्वयं ददाति ।)

चेटी—(विहस्य) अदिकादरे इह ट्ठिदं पि को तुमं पेक्खदि । णं विसुमरिदो अन्तरे रत्तासोअपादवो । ता इह एव चिट्ठह्म ।

(विहस्य) अतिकातरे इह स्थितामपि कस्त्वां पश्यति । ननु विस्मृतोऽन्तरे रक्ताशोकपादपः । तदिहैव तिष्ठावः ।

(तथा कुरुतः ।)

विदूषकः—(निरूप्य) भो वअस्स एसा सा चन्दमणिसिळा ।

(निरूप्य) भो वयस्य एषा सा चन्द्रमणिशिला ।

(नायकः सबाष्पं निश्वसिति ।)

चेटी—भट्टिदारिए एसा सेत्ति आळावो सुणीअदि । ता अवहिदा सुणह्म ।

भर्तृदारिके, एषा सेत्यालापः श्रूयते । तदवहिते शृणुवः ।

Perhaps he will see me. So come. We shall go elsewhere.

(*Places two footsteps, the thigh shaking*)

Maid-servant. (*Laughing*) Most timid lady, who will see you when you are here ? Certainly, you have forgot there is the red Aśoka tree intercepting. Let us therefore stand here only.

(*They do so*)

Vidūṣaka. (*Seeing*) Oh friend, this is that slab of Candrakānta.

(*The Hero sobs with tears*)

Maid-servant. Princess, 'this is that' is the alk here. So let us hear attentively.

(उभे आकर्णयतः।)

विदूषकः—(हस्तेन चालयन्) भो वअस्स णं भणामि एसा सा चन्दमणिसिळ त्ति।

(हस्तेन चालयन्) भो वयस्य ननु भणामि एषा सा चन्द्रमणिशिलेति।

नायकः—वयस्य सम्यगुपलक्षितम्। (हस्तेन निर्दिशन्)

शशिमणिशिला सेयं यस्यां विपाण्डुरमाननं
करकिसलये कृत्वा वामे घनश्वसितोद्गमा।
चिरयति मयि व्यक्ताकूता मनाक्स्फुरितैर्भ्रुवो-
र्नियमितमनोमन्युर्दृष्टा मया रुदती प्रिया ॥ ६ ॥

तदस्यामेव चन्द्रकान्तमणिशिलायामुपविशावः।

नायिका—(विचिन्त्य) का उण एसा भविस्सदि।

(*Both listen*)

Vidūṣaka. (*Shaking him with the arm*) Oh friend, I do say, this is that slab of Candrakānta.

Hero. Friend, well noted. (*Pointing by his hand*)

This is the Candrakānta slab where my beloved was seen by me, resting her pale face on her sprout-like left hand, sighing heavily, and betraying her mind, while I was late, by the slight throbbing of her brows, and controlling her anger within and weeping. (6)

So we shall sit on this Candrakānta slab itself.

(विचिन्त्य) का पुनरेषा भविष्यति ।

चेटी—भट्टिदारिए जह अम्मे ओवारिदसरीराओ एदं पेक्खह्म, तह तुवं पि एदेण दिट्ठा भवे ।

भर्तृदारिके यथाऽऽवामपवारितशरीरे एतं पश्यावः तथा त्वमप्येतेन दृष्टा भवेः ।

नायिका—जुज्जइ एदं । किं पुण पणअकुविदं पिअजणं हिअए करिअ मन्तेदि ।

युज्यत एतत् । किं पुनः प्रणयकुपितं प्रियजनं हृदये कृत्वा मन्त्रयते ।

चेटी—मा ईदिसं आसङ्कं करेहि । पुणो वि दाव सुणह्म ।

मा ईदृशीमाशङ्कां कुरु । पुनरपि तावच्छृणुवः ।

विदूषकः—(आत्मगतम्) अहिरमदि एसो एदाए कहाए । भोदु, एदं एव से वड्ढावइस्सं । (प्रकाशम्) भो वअस्स तह परुण्णा तुए किं भणिदा ।

(आत्मगतम्) अभिरमत एष एतया कथया । भवतु, एतदेवा-

Heroine. *(Reflecting)* Who is she likely to be ?

Maid-servant. Princess, just as we see him hiding ourselves, so you might have been seen by him also.

Heroine. It is likely. But he speaks with reference to a lady in a love-quarrel.

Maid-servant. Don't feel any such apprehension. We shall listen further.

Vidūṣaka. (*Within*) He takes delight in this talk. Let it be. I will push it on further.

स्य वर्धयिष्यामि। (प्रकाशम्) भो वयस्य तथा प्ररुदिता त्वया किं भणिता।

नायकः—वयस्य इदमुक्ता—

निष्यन्दत इवानेन मुखचन्द्रोदयेन ते।
एतद्बाष्पाम्बुना सिक्तं चन्द्रकान्तशिलातलम् ॥ ७ ॥

नायिका—(सरोषम) सुदं एदं चउरिए। अत्थि किंपि अदो वरं सोदव्वं। (सास्रम्) एहि गच्छह्म।

(सरोषम्) श्रुतमेतच्चतुरिके। अस्ति किमप्यतः परं श्रोतव्यम्। (सास्रम्) एहि गच्छावः।

चेटी—(हस्तेन गृहीत्वा) भट्टिदारिए मा एवं। जेण तुवं दिट्ठा, सो अण्णं उद्दिसिअ एवं भणिस्सदि त्ति ण मे हिअअं पत्तिआअदि। ता कहावसाणं दाव पडिवाळह्म।

(हस्तेन गृहीत्वा) भर्तृदारिके मैवम्। येन त्वं दृष्टा, सोऽन्यामु-

---

(*Aloud*) Oh friend, when she was so weeping, what was she told by you?

Hero. Friend, she was told this—

This Candrakānta stone drenched in tears seems to melt (and flow) by this Moon-rise of your face. (7)

Heroine. (*Angrily*) You heard this, Caturikā? Is there anything more to be heard? (*Weeping*) Come, let us go.

Maid-servant. (*Seizing by the hand*) Princess, don't say so. My mind does not believe that a man by whom you had been seen would say this with

द्वितीयैवं भणिष्यतीति न मे हृदयं प्रत्येति । तत् कथावसानं तावत् प्रतिपालयावः ।

नायकः—वयस्य तामेवास्यां शिलायामालिख्य तया चित्रगतया-त्मानं विनोदयेयम् । तदित एव गिरितटान्मनश्शिलाशकलान्यानय ।

विदूषकः—जं भवं आणवेदि । (निष्क्रम्य प्रविश्य) भो वअस्स तुए एक्को वण्णो आणत्तो, मए उण इह पव्वदादो पञ्च वण्णा आणीदा । ता आलिहदु भवं ।

यद्भवानाज्ञापयति । (निष्क्रम्य प्रविश्य) भो वयस्य त्वयैको वर्ण आज्ञप्तः, मया पुनरिह पर्वतात्पञ्च वर्णा आनीताः । तदालिखतु भवान् ।

नायकः—वयस्य साधु कृतम् ।

(गृहीत्वा शिलायामालिखन् सरोमाञ्चम् ।)

सखे पश्य पश्य,

---

regard to another woman. Therefore let us await the end of the narration.

Hero. Friend, after making a drawing of her on this stone let me amuse myself by her in the picture. So fetch me pieces of red arsenic from the crust of this hill.

Vidūṣaka. As you direct. (*Exit and re-enter*) Oh friend, you ordered one colour, but I have brought here from the hill five colours. So write.

Hero. Friend, well done. (*Receiving, writing on the stone, with hair standing on their ends*) Friend, see, see.

अक्लिष्टबिम्बशोभाधरस्य नयनोत्सवस्य शशिन इव ।
दयितामुखस्य सुखयति रेखापि प्रथमदृष्टेयम् ॥ ८ ॥

(आलिखति)

विदूषकः—(सकौतुकं निर्वर्ण्य) भो वअस्स अप्पच्चक्खं वि एवं आलिहीअदित्ति अच्छरिअं ।

(सकौतुकं निर्वर्ण्य) भो वयस्य अप्रत्यक्षमप्येवमालिख्यत इत्याश्चर्यम् ।

नायकः—वयस्य

प्रिया संनिहितैवेयं संकल्पैः स्थापिता पुरः ।
दृष्ट्वा दृष्ट्वा लिखाम्येनां यदि तत्कोऽत्र विस्मयः ॥ ९ ॥

Like the first visible digit of the Moon shining in the full glory of its disc and affording a feast for the eyes, even the first glimpse of the outline of my beloved's face possessed of a lower lip shining like a well-ripe Bimba fruit and affording feast for the eyes, causes delight. (8)

(*Draws the picture*)

Vidūṣaka. (*Looking with curiosity*) Oh friend, it is a wonder that you write like this without looking at the original.

Hero. Friend,

My beloved is actually present, having been placed in my front by my thoughts. Seeing then and there, I write her picture. If so, where is the wonder ? (9)

नायिका—(निःश्वस्य सास्रम्) चउरिए जादं खु कहावसाणं । ता एहि । अय्यमित्तावसुं दाव पेक्खह्म ।

(निःश्वस्य सास्रम्) चतुरिके जातं खलु कथावसानम् । तदेहि । आर्यमित्रावसुं तावत् पश्यावः ।

चेटी—(सविषादमात्मगतम्) हं जीविअणिरपेक्खो विअ से आळावो । (प्रकाशम्) भट्टिदारिए गदा एव तहिं मणोहरिआ । अदो कदाइ भट्टिदारओ मित्तावसू इह एव आअच्छे ।

(सविषादमात्मगतम्) हं जीवितनिरपेक्ष इवास्या आलापः । (प्रकाशम्) भर्तृदारिके गतैव तस्मिन् मनोहारिका । अतः कदाचिद्भर्तृदारको मित्रावसुरिहैवागच्छेत् ।

(ततः प्रविशति मित्रावसुः ।)

मित्रावसुः—आज्ञापितोऽस्मि तातेन । यथा—वत्स मित्रावसो कुमारो जीमूतवाहनोऽस्माभिरिहासन्नवासात् सुपरीक्षितः, तद्

Heroine. (*Sighing, with tears*) O Caturikā, the topic has ended. So come. Let us see the venerable Mitrāvasu.

Maid-servant. (*With sorrow, to herself*) Alas! Her talk bespeaks her despair with regard to life. (*Aloud*) Princess, Manoharikā has already gone to him. Therefore Prince Mitrāvasu might perhaps come here himself.

(*Enter* Mitrāvasu)

Mitrāvasu. I have been commanded by my father thus—'Dear Mitrāvasu, Prince Jīmūtavāhana has been well examined by us on account of

योग्योऽयं वरः । तस्मै वत्सा मलयवती प्रतिपाद्यतामिति । अहं तु स्नेहपराधीनतयान्यदेव किमप्यवस्थान्तरमनुभवामि । कुतः,

यद्विद्याधरराजवंशतिलकः प्राज्ञः सतां संमतो
रूपेणाप्रतिमः पराक्रमधनो विद्वान् विनीतो युवा ।
यच्चासूनपि संत्यजेत् करुणया सत्त्वार्थमभ्युद्यत-
स्तेनास्मै ददतः स्वसारमतुला तुष्टिर्विषादश्च मे ॥१०॥

श्रुतं च मया । यथा—असौ जीमूतवाहनोऽत्रैव गौर्याश्रमसंबद्धे चन्दनलतागृहे वर्तत इति । तदेतच्चन्दनलतागृहम् । यावत् प्रविशामि । (प्रविशति)

विदूषकः—(ससंभ्रममवलोक्य) भो वअस्स इमिणा पच्छादेहि

---

his living near by. He is therefore a suitable bridegroom. Let my daughter Malayavatī be given to him.' But somehow I feel otherwise owing to too much attachment. For—

He is an ornament of the race of the Vidyādhara kings. He is a wise man and a favourite of the good. He is matchless in beauty, and valour is his wealth. He is learned, modest and young. (But) He will even sacrifice his life, being actuated by sympathy for living beings. Therefore I enjoy both unequalled joy and sorrow in giving my sister to him. (10)

It has also been heard by me that this Jīmūtavāhana remains in the sandal-bower adjoining Gāurī's temple in this place itself. This is the sandal-bower. I shall just enter. (*Enters*)

कदलीपत्तेण इमं चित्तगदं कम्म । एसो खु सिद्धजुअराओ मित्ता-वसू इह एव आअदो । कदाइ एसो पेक्खे ।

(ससंभ्रममवलोक्य) भो वयस्य अनेन प्रच्छादय कदलीपत्रेणेदं चित्रगतं कर्म । एष खलु सिद्धयुवराजो मित्रावसुरिहैवागतः। कदाचिदेष पश्येत् ।

(नायकः कदलीपत्रेण प्रच्छादयति ।)

मित्रावसुः—(उपसृत्य) कुमार मित्रावसुः प्रणमति ।

नायकः—(दृष्ट्वा) मित्रावसो स्वागतम् । इह स्थीयताम् ।

चेटी—भट्टिदारिए आअदो खु एसो मित्तावसू ।

भर्तृदारिके आगतः खल्वेष मित्रावसुः ।

नायिका—हञ्जे पिअं मे । हञ्जे प्रियं मे ।

नायकः—मित्रावसो अपि कुशली सिद्धराजो विश्वावसुः ।

Vidūṣaka. (Seeing in a hurry) Oh friend, conceal this design by this plantain-leaf. For this Siddha prince Mitrāvasu has come here actually. Perhaps he might see it. (*The Hero hides the design by means of a plantain-leaf*)

Mitrāvasu. (Approaching) Prince, I, Mitrāvasu bow to you.

Hero. (Seeing) Mitrāvasu, welcome. Take your seat here.

Maid-servant. Princess, Mitrāvasu has actually come here.

Heroine. Maid, I am happy.

Hero. Mitrāvasu, is the Siddha king Viśvāvasu

मित्रावसुः—कुशली तातः । तातसंदेशेनैवास्मि त्वत्सकाशमिहागतः ।

नायकः—किमाह तत्रभवान् ।

नायिका—सुणिस्सं दाव किं तादेण संदिट्ठं त्ति ।

श्रोष्यामि तावत् किं तातेन संदिष्टमिति ।

मित्रावसुः—इदमाह तातः—अस्ति मे दुहिता मलयवती नाम जीवितमिवास्य सर्वस्यैव सिद्धराजान्वयस्य । सा मया तुभ्यं प्रतिपादिता, प्रतिगृह्यतामिति ।

चेटी—(विहस्य) भट्टिदारिए किं ण कुप्पसि दाणिं ।

(विहस्य) भर्तृदारिके किं न कुप्यसीदानीम् ।

नायिका—(सस्पृहं सलज्जं चाधोमुखी स्थित्वा) हञ्जे ! मा तुस्स । किं विसुमरिदं दे एदस्स अण्णहिअअत्तणं ।

(सस्पृहं सलज्जं चाधोमुखी स्थित्वा) हञ्जे मा तुष्य । किं विस्मृतं

---

well ?

Mitrāvasu. My father is well. It is at the bidding of my father that I have come to you.

Hero. What does the revered king say ?

Heroine. I shall just hear what is the message of my father.

Mitrāvasu. My father says this—'I have a daughter named Malayavatī who is the life, as it were, of this entire race of Siddha kings. She has been given by me to you. Let her be accepted.'

Maid-servant. (Laughing) Princess, why don't you get angry now ?

त एतस्यान्यहृदयत्वम् ।

नायकः—(अपवार्य) वयस्य सङ्कटे पतिताः स्मः ।

विदूषकः—(अपवार्य) भो जाणामि भवदो ण तं वज्जिअ अण्णहिं चित्तं अहिरमदि त्ति । तह वि जं किंचि भणिअ विसज्जीअदु एसो ।

(अपवार्य) भो जानामि भवतो न तां वर्जयित्वान्यत्र चित्तमभिरमत इति । तथापि यत्किंचिद्भणित्वा विसृज्यतामेषः ।

नायिका—(सरोषमात्मगतम्) हदास को वा एदं ण जाणादि ।

(सरोषमात्मगतम्) हताश को वैतन्न जानाति ।

नायकः—मित्रावसो क इव नेच्छेद्भवद्भिः सह श्लाघ्यमिमं संबन्धम् । किन्तु न शक्यते चित्तमन्यतः प्रवृत्तमन्यतो निवर्तयितुम् । अतो नाहमेनां प्रतिग्रहीतुमुत्सहे ।

Heroine. (*Remaining with face downcast in eagerness and shyness*) Maid, don't be glad. Have you forgotten his attachment to another ?

Hero. (*Aside*) Friend, we have fallen into trouble.

Vidūṣaka. (*Aside*) Oh, I know that your heart does not take delight in any other object than her. However say something and leave him.

Heroine. (*Angrily, within*) Mischievous man, whoever does not know this ?

Hero. Mitrāvasu, who will not desire this commendable alliance with you ? But it is not possible to turn back the heart which has gone one

(नायिका मूर्च्छां नाटयति)

चेटी—समस्ससदु समस्ससदु भट्टिदारिआ ।

समाश्वसितु समाश्वसितु भर्तृदारिका ।

विदूषकः—भो पराहीणो खु एसो । ता किं एदेण भणन्तेण । गुरुजणं से गदुअ अब्भत्थेहि ।

भोः पराधीनः खल्वेषः । तत् किमेतेन भणता । गुरुजनमस्य गत्वाभ्यर्थयस्व ।

मित्रावसुः—(आत्मगतम्) साधूक्तम् । नायं गुरुवचनमतिक्रामति । एष गुरुजनोऽप्यस्मिन्नेव गौर्याश्रमे प्रतिवसति । तद्यावद्गत्वास्य पित्रोर्मलयवतीं प्रतिग्राहयामि ।

(नायिका समाश्वसिति)

मित्रावसुः—(प्रकाशम्) एवं निवेदितात्मनोऽस्मान् प्रत्याचक्षाणः

---

way towards another. Hence I don't make bold to accept her.

(*Heroine gesticulates fainting*)

Maid-servant. Be consoled, princess, be consoled.

Vidūṣaka. Sir, he is only a dependent. So what is the use of his saying anything ? Go and request his elders.

Mitrāvasu. *(Within)* Well said. This man never violates his father's words. His father also lives in this very temple of Gāurī. Therefore I will go to his parents and make him accept Malayavatī.

(*The Heroine recovers her senses*)

Mitrāvasu. (*Aloud*) Thus rejecting our prayer,

कुमार एव बहुतरं जानाति ।

नायिका—(सरोषम्) कहं पच्चक्खाणलहुओ मित्तावसू पुणो वि मन्तेदि ।

(सरोषम्) कथं प्रत्याख्यानलघुर्मित्रावसुः पुनरपि मन्त्रयते ।

(निष्क्रान्तो मित्रावसुः)

नायिका—(सास्रमात्मानं पश्यन्ती) किं मम एदिणा दोब्भग्गकलङ्कमलिणेण अच्चन्तदुक्खभाइणा अज्ज वि सरीरहदएण । जाव इह एव रत्तासोअपादवे इमाए अदिमुत्तलदाए उब्बन्धिअ अत्ताणं वावादइस्सं । ता एवं दाव । (प्रकाशं सविलक्षस्मितम्) हञ्जे ! पेक्ख दाव मित्तावसू दूरं गदो ण वेत्ति । जेण अहं इदो गमिस्सं ।

(सास्रमात्मानं पश्यन्ती) किं ममैतेन दौर्भाग्यकलङ्कमलिनेनात्यन्तदुःखभागिनाद्यापि शरीरहतकेन । यावदिहैव रक्ताशोकपादपेऽनयातिमुक्तलतयोद्बध्यात्मानं व्यापादयिष्यामि । तदेवं तावत् । (प्रकाशं सविलक्षस्मितम्) हञ्जे पश्य तावन्मित्रावसुर्दूरं

---

the prince himself is too wise.

Heroine. (*Indignantly*) How does Mitrāvasu, though slighted by this refusal speak to him again?

(*Exit* Mitrāvasu)

Heroine. (*Looking at herself with tears*)

What is the use of even now having this wretched body of mine which is stained by misfortune and subjected to extreme misery? I will tie this Atimukta creeper round my neck and hang myself on a branch of this red Aśoka tree itself. So I will do thus. (*Aloud, feeling embarassed, with a*

गतो न वेति । येनाहमपीतो गमिष्यामि ।

चेटी—जं भट्टिदारिआ आणवेदि । (कतिचित् पदानि गत्वा) अण्णादिसं से हिअअं पेक्खामि । ता ण दाव गमिस्सं । इह एव ओवारिदा पेक्खामि किं एसा पडिवज्जदि त्ति ।

यद्भर्तृदारिकाऽऽज्ञापयति । (कतिचित पदानि गत्वा) अन्यादृशमस्या हृदयं पश्यामि । तन्न तावद्गमिष्यामि । इहैवापवारिता पश्यामि किमेषा प्रतिपद्यत इति ।

नायिका—(उत्थाय दिशो विलोक्य पाशं गृहीत्वा सास्रम्) भअवदि गोरि इह तुए ण किदो पसादो । ता अण्णस्सिं पि दाव जम्मे जह ण ईदिसी दुक्खभाइणी होमि, तह करेहि । (कण्ठे पाशमर्पयति ।)

(उत्थाय दिशो विलोक्य पाशं गृहीत्वा सास्रम्) भगवति गौरि इह त्वया न कृतः प्रसादः । तदन्यस्मिन्नपि तावज्जन्मनि यथा नेदृशी दुःखभागिनी भवामि, तथा कुरु । (कण्ठे पाशमर्पयति ।)

---

smile) Maid, see whether or not Mitrāvasu has gone far off so that I may also go away from this place.

Maid-servant. As the princess commands. (*Walking a few steps*) I see her mind is peculiar. Therefore I shall not go. Let me remain here alone concealed and see what she does.

Heroine. (*Standing, looking in all directions, taking the rope and weeping*) O Goddess Gāurī, you have not bestowed your grace on me in this world. You will at least spare me from this kind of misery in the other birth.

(*Applies the noose round her neck*)

चेटी—(दृष्ट्वा ससंभ्रमम्) परित्ताअह परित्ताआह । एसा भट्टिदारिआ उब्बन्धिअ अत्ताणं वावादेदि ।

(दृष्ट्वा ससंभ्रमम्) परित्रायध्वं परित्रायध्वम् । एषा भर्तृदारिकोद्बध्यात्मानं व्यापादयति ।

नायकः—(ससंभ्रममुपेत्य) क्वासौ क्वासौ ।

चेटी—इअं असोअपादवे । इयमशोकपादपे ।

नायकः—(दृष्ट्वा सहर्षम्) कथं सैवेयमस्मन्मनोरथभूमिः ।

(नायिकां पाणौ गृहीत्वा लतापाशमाक्षिपन्)

न खलु न खलु मुग्धे साहसं कार्यमेवं
व्यपनय करमेतत्पल्लवाभं लतायाः ।
कुसुममपि विचेतुं यो न मन्ये समर्थः
कलयति स कथं ते पाशमुद्बन्धनाय ॥ ११ ॥

Maid-servant. *(Seeing in excitement)* Help, help. Here the princess kills herself by hanging.

Hero. *(Coming in a hurry)* Where is she ? Where is she ?

Maid-servant. Here (she is) at the Aśoka tree.

Hero. *(Looking, joyfully)* How is it she is the very same object of our love ! *(Taking the Heroine by the hand and warding off the noose made of creeper)*

Foolish lady, don't, don't do this rash act. Take off from the creeper this hand which resembles a tender leaf. The hand which I think is not strong enough even to pluck flowers—how does it take hold

नायिका—(ससाध्वसम्) हद्धि । को णु खु एसो । (नायकं निरूप्य सरोषं हस्तमाक्षेप्तुमिच्छति ।) मुञ्च मुञ्च मे अग्गहत्थं । को तुमं णिवारेदुं । मरणे वि किं तुमं एव अब्भत्थणीओ ।

(ससाध्वसम्) हा धिक् । को नु खल्वेषः । (नायकं निरूप्य सरोषं हस्तमाक्षेप्तुमिच्छति ।) मुञ्च मुञ्च मेऽग्रहस्तम् । कस्त्वं निवारयितुम् । मरणेऽपि किं त्वमेवाभ्यर्थनीयः ।

नायकः—नाहं मुञ्चामि ।

कण्ठे हारलतायोग्ये येन पाशस्तवार्पितः ।
गृहीतः सापराधोऽयं स कथं मुच्यते करः ॥ १२ ॥

विदूषकः—भोदि किं पुण से मरणववसाअस्स कारणं ।

भवति किं पुनरस्या मरणव्यवसायस्य कारणम् ।

चेटी—(साकूतम्) णं एसो एव दे पिअवअस्सो ।

(साकूतम) नन्वेष एव ते प्रियवयस्यः ।

---

of the string for hanging yourself ? (11)

Heroine. *(With fear)* Oh, fie ! Who is this man ? *(Looking at the Hero, tries to draw back her hand indignantly)* Leave, leave my fore-arm. Who are you to prevent me ? Are you to be asked for permission even for death ?

Hero. I shalln't leave you.

This hand by which a noose has been applied to your neck which deserves the necklace has been caught red-handed. How can it be released ? (12)

Vidūṣaka. Madam, what is the reason for her resolve to die ?

नायकः—(सानुशयम्) कथमहमेवास्या मरणकारणम् । न खल्व-वगच्छामि ।

विदूषकः—भोदि कहं विअ । भवति कथमिव ।

चेटी—जा सा पिअवअस्सेण दे का वि हिअअवल्लहा आलिहिदा, ताए पक्खवादिणा पच्चाचिक्खन्तस्स मित्तावसुणो णाहं पडिच्छामि त्ति सुणिअ जादणिव्वेदाए इमाए एवं ववसिदं ।

या सा प्रियवयस्येन ते कापि हृदयवल्लभा आलिखिता, तस्यां पक्षपातिना प्रत्याख्यातस्य मित्रावसोर्नाहं प्रतीच्छामीति श्रुत्वा जातनिर्वेदयानयैवं व्यवसितम् ।

नायकः—(सहर्षमात्मगतम्) कथमियमेवासौ विश्वावसोर्दुहिता मलयवती । अथवा, रत्नाकरादृते कुतश्चन्द्रलेखाप्रसूतिः । कष्ट,

---

Maid-servant. (Suggestively) Of course it is this dear friend of yours.

Hero. (Remorsefully) How am I myself the cause of her death ? I don't understand.

Vidūṣaka. Madam, how is it ?

Maid-servant. The picture of some lady dear to his heart has been drawn by your dear friend, and out of predilection for her, Mitrāvasu's request has been rejected by him saying—'I can't accept her.' On hearing this my mistress grew disgusted and has resolved thus.

Hero. (Joyfully, within) How, is this lady herself Malayavatī, the daughter of Viśvāvasu ? Or whence will the digit of the Moon derive its source

मनाग्वञ्चितोऽस्मि ।

विदूषकः—भोदि जइ एवं, अणवरद्धो दाणिं पिअवअस्सो । अहव जइ ण पत्तिआअदि, सअं एव गदुअ सिळादळं पेक्खदु होदी ।

भवति यद्येवम्, अनपराद्ध इदानीं प्रियवयस्यः । अथवा यदि न प्रत्येति, स्वयमेव गत्वा शिलातलं पश्यतु भवती ।

नायिका—(सहर्षं सलज्जं च नायकं पश्यन्ती हस्तमाक्षेप्तुमिच्छति ।) मुञ्च मुञ्च मे अग्गहत्थं । मुञ्च मुञ्च मेऽग्रहस्तम् ।

नायकः—(सस्मितम्) न तावन्मुञ्चामि, यावन्मया हृदयवल्लभां शिलायामालिखितां न पश्यसि ।

(सर्वे परिक्रामन्ति ।)

विदूषकः—(कदलीपत्रमपनीय) एसा से हिअअवळ्ळहा ।

(कदलीपत्रमपनीय) एषास्य हृदयवल्लभा ।

नायिका—(निरूप्यापवार्य सस्मितम्) चउरिए अहं विअ आळिहिदा ।

---

except from the Ocean ? Pity, I was a little misled.

Vidūṣaka. Madam, if so, my dear friend is not culpable now. Or, if you don't believe, you may yourself go and look at the stone.

Heroine. (*Seeing the Hero with joy and shyness, tries to draw back her hand*) Release, release my fore-arm.

Hero. (*With a smile*) I won't release so long as you do not see my sweetheart written on the stone. (*All walk forward*)

Vidūṣaka. (*Removing the plantain leaf*) This lady is his sweetheart.

(निरूप्यापवार्य सस्मितम्) चतुरिके अहमिवालिखिता ।

चेटी—(चित्राकृतिं नायिकां च निर्वर्ण्य) भट्टिदारिए किं भणासि अहं विअ आळिहिहिदत्ति । एरिसं से सारिक्खं, जेण ण आणीअदि किं दाव इह मणिसिळादळे भट्टिदारिआए पडिबिम्बं संकन्दं, आदु तुवं आळिहिदत्ति ।

(चित्राकृतिं नायिकां च निर्वर्ण्य) भर्तृदारिके किं भणसि अहमिवालिखितेति । ईदृशमस्य सादृश्यं, येन न ज्ञायते किं तावदिह मणिशिलातले भर्तृदारिकायाः प्रतिबिम्बं संक्रान्तम्, उत त्वमालिखितेति ।

नायिका—(विहस्य) दुज्जणीकिदह्मि इमिणा इदं चित्तं दंसअन्तेण ।

(विहस्य) दुर्जनीकृतास्म्यमुनेदं चित्रं दर्शयता ।

विदूषकः—भो ! णिव्वुत्तो दाणिं गांधव्वो विवाहो । मुञ्च दाणिं से अग्गहत्थं । एसा का वि तुरिअतुरिअं आअच्छदि ।

Heroine. (*Seeing, aside with a smile*) Caturikā, it seems to be me that has been written.

Maid-servant. (*Looking at the drawing and at the Heroine*) Princess, do you say 'it seems to be me that has been written ?' Its similarity is such that it is not known whether it is the reflection of the princess on the surface of this precious stone or whether you have been written.

Heroine. (*Laughing*) Showing me this picture, he has made me an offender.

भोः निर्वृत्त इदानीं गान्धर्वो विवाहः । मुञ्चेदानीमस्या अग्रहस्तम् । एषा कापि त्वरितत्वरितमागच्छति ।

(नायको मुञ्चति)

(प्रविश्य)

चेटी—(सहर्षं सहसोपसृत्य) भट्टिदारिए ! पडिच्छिदा तुवं जीमूदवाहणस्स गुरूहिं ।

(सहर्षं सहसोपसृत्य) भर्तृदारिके प्रतीष्टा त्वं जीमूतवाहनस्य गुरुभिः ।

विदूषकः—(नृत्यन्) संपुण्णो मणोरहो पिअवअस्सस्स । अहव अत्तहोदीए । अहव ण एदाणं । (भोजनमभिनयन्) मम एव बह्मणस्स ।

(नृत्यन्) संपूर्णो मनोरथः प्रियवयस्यस्य । अथवात्रभवत्याः । अथवा नैतयोः । (भोजनमभिनयन्) ममैव ब्राह्मणस्य ।

Vidūṣaka. Oh. now has taken place matrimony by mutual consent. Now release her fore-arm. Some woman comes here in hot haste.

(*The Hero lets off the Heroine's hand*)

(*Entering*)

A maid-servant. (*Coming near suddenly, with joy*) Princess, you have been accepted by the parents of Jīmūtavāhana.

Vidūṣaka. (*Dancing*) My friend's ambition has been fulfilled, or, rightly speaking, the ambition of this lady. Nay, not the ambition of these two, but the ambition (*gesticulating eating*) of myself, he Brahmin.

चेटी—(नायिकामुद्दिश्य) आणत्तह्मि जुवराअमित्तावसुणा । जह—अज्ज एव मळअवदीए विवाहो । ता ळहु एदं गेह्णिअ आअच्छत्ति । ता एहि गच्छह्म ।

(नायिकामुद्दिश्य) आज्ञप्तास्मि युवराजमित्रावसुना । यथा—अद्यैव मलयवत्या विवाहः । तल्लघ्वेनां गृहीत्वाऽऽगच्छेति । तदेहि गच्छावः ।

विदूषकः—गदा तुवं दासीए धीदे एदं गह्णिअ । पिअवअस्सेण उण इह एव अच्चिदव्वं ।

गता त्वं दास्याःपुत्रि एतां गृहीत्वा । प्रियवयस्येन पुनरत्रैवासितव्यम् ।

चेटी—हदास मा तुवर । तुह्माणं पि ह्णावणअं आअदं एव ।

हताश मा त्वरस्व । युष्माकमपि स्नापनकमागतमेव ।

(नायिका सानुरागं सलज्जं नायकं पश्यन्ती सपरिवारा निष्क्रान्ता ।)

Maid-servant. (*Towards the Heroine*) I have been ordered by Prince Mitrāvasu thus :—'To-day is the marriage of Malayavatī. Therefore take her here soon.' Hence come. Let us go.

Vidūṣaka. Whore's daughter, taking her, you have gone. My dear friend, on the other hand, will have only to remain here.

Maid-servant. Greedy chap, don't be impatient. The bathing materials for you also have already come.

(*Looking at the Hero, with love and bashfulness, Exit the Heroine along with retinue*).

(नेपथ्ये)

वृष्ट्या पिष्टातकस्य द्युतिमिह मलये मेरुतुल्यां दधानः
सद्यः सिन्दूरदूरीकृतदिवससमारम्भसन्ध्यातपश्रीः ।
उद्गीतैरङ्गनानां चलचरणरणन्नूपुरह्लादहृद्यै-
रुद्वाहस्नानवेलां कथयति भवतः सिद्धये सिद्धलोकः॥१३॥

विदूषकः—(आकर्ण्य) भो वअस्स आअदं ह्लावणअं ।
(आकर्ण्य) भो वयस्य आगतं स्नापनकम् ।

नायकः—(सहर्षम्) सखे यद्येवं, किमिदानीमिह स्थीयते । तदागच्छ । तातं नमस्कृत्य स्नानभूमिमेव गच्छावः ।

अन्योन्यदर्शनकृतः समानरूपानुरागकुलवयसाम् ।
केषांचिदेव मन्ये समागमो भवति पुण्यवताम् ॥१४॥

(निष्क्रान्तौ ।)

द्वितीयोऽङ्कः ।

(*Behind the scenes*)

Imparting Meru-like splendour to this Malaya by the shower of perfumed yellow powder, and suddenly eclipsing the beauty of the morning and the evening twilight by the shower of saffron, the world of Siddhas proclaims, for the felicity (of all concerned), the hour of your marital bath through the songs of ladies which are charming by the noise of the jingling anklets on their moving feet.(13)

Vidūṣaka. (*Listening*) Oh friend, it is the time for our bath.

Hero. (*Joyfully*) Friend, if so, why do we

अथ तृतीयोऽङ्कः ।

(ततः प्रविशति मत्त उज्ज्वलवेषश्चषकहस्तो विटश्चेटश्च ।)

विटः—

णिच्चं जो पिबइ सुरं जणस्स पियसङ्गमं च जो कुणइ ।
मह दे दो च्चिअ देवा बळदेवो कामदेवो अ ॥ १ ॥

सफळं खु मम सेहरअस्स जीविअं,

वच्छत्थळम्मि दइआ दिण्णुप्पळवासिआ मुहे मइरा ।
सीसम्मि अ सेअरओ णिच्चं च्चिअ सण्ठिआ जस्स ॥२॥

(परिस्खलन्) अरे को मं चाळेइ । (सहासम्) अवस्सं णोमाळिआ मं परिहसदि ।

---

remain here now? Hence come. After saluting our father let us go to the bathing place itself.

Wedlock brought about by the mutual exchange of glances between persons who are alike in beauty, love, heredity and age is, I think, within the reach of only the meritorious few. (14)

(*Exeunt*)

The End of the Second Act.

ACT THE THIRD

(*Enter a drunken* Viṭa *in attractive costume with a drinking cup in hand and* Ceṭa)

Viṭa. The two alone are my Gods—Baladeva and Kāmadeva—the one who always drinks wine,

नित्यं यः पिबति सुरां जनस्य प्रियसङ्गमं च यः करोति ।
मम तौ द्वावेव देवौ बलदेवः कामदेवश्च ॥ १ ॥

सफलं खलु मम शेखरकस्य जीवितम् ।

वक्षःस्थले दयिता दत्तोत्पलवासिता मुखे मदिरा ।
शीर्षे च शेखरं नित्यमेव संस्थितानि यस्य ॥ २ ॥

(परिस्खलन्) अरे को मां चलयति । (सहासम्) अवश्यं नवमालिका मां परिहसति ।

चेटः—भट्टका ण दाव आअदा णोमालिआ ।

भट्टक न तावदागता नवमालिका ।

विटः—(सरोषम्) पढमप्पदोस एव्व मळयवदीविवाहमङ्गळं णिव्वुत्तं । ता कीस इदाणिं पभादे वि ण आअच्छदि । (सहर्षम्) अहव इमस्सि मळअवदीए विवाहमङ्गळूसवे सव्वो एव्व णिअप्पणइणीजणसणाहो सिद्धविज्जाहरळोओ कुसुमाअरुय्याणे आवाणसोक्खं अणुहोदि । ता तहिं एव्व णोमाळिआ मं उदिक्खमाणा

---

the other who brings about the union of persons with their sweethearts. (1)

Fruitful is the life of me, Śekharaka—

In whom the three are permanently present—the beloved on the breast, the wine perfumed by blue lotuses in the mouth and the crown on the head. (2)

(*Stumbling*) Eh! Who moves me? (*With laughter*) Certainly Navamālikā makes fun of me.

Ceṭa. Master, Navamālikā is not yet come.

चिट्ठइ । ता तहिं एव्व गमिस्सं । कीदिसो णोमालिआए विणा सेहरओ (स्खलन् परिक्रामति ।)

(सरोषम्) प्रथमप्रदोष एव मलयवतीविवाहमङ्गलं निर्वृत्तम् तत् कस्मादिदानीं प्रभातेऽपि नागच्छति । (सहर्षम्) अथवा अमुष्मिन् मलयवत्या विवाहमङ्गलोत्सवे सर्व एव निजप्रणयिनीजनसनाथः सिद्धविद्याधरलोकः कुसुमाकरोद्याने आपानसौख्यमनुभवति । तत् तस्मिन्नेव नवमालिका मामुदीक्षमाणा तिष्ठति । तत् तस्मिन्नेव गमिष्यामि । कीदृशो नवमालिकया विना शेखरकः । (स्खलन् परिक्रामति ।)

चेटः—एदं उय्याणं । पविसदु भट्टओ ।

एतदुद्यानं, प्रविशतु भट्टकः ।

(उभौ प्रविशतः ।)

Viṭa. (*Indignantly*) Last evening itself, the auspicious marriage-function of Malayavatī has been celebrated. Then why couldn't she return yet, though it has dawned? (*Joyfully*) Or, in this happy occasion of Malayavatī's marriage the entire host of Siddhas and Vidyādharas accompanied by their respective sweethearts enjoy the pleasure of drink in the Kusumākara garden. So Navamālikā is waiting there only in expectation of me. Therefore, I will go there. What is Śekharka without Navamālikā? (*Walks on stumbling*)

Ceṭa. This is the garden. Master, enter this.

(*Both enter*)

(ततः प्रविशति स्कन्धन्यस्तवस्त्रयुगलो विदूषकः ।)

विदूषकः—सुदं मए पिअवअस्सो कुसुमाअरुज्जाणं गमिस्सदित्ति । ता जाव तहिं एव गमिस्सं । (परिक्रम्य) एदं उज्जाणं, जाव पविसामि । (प्रविश्य भ्रमरसंपातं नाटयन्) कीस उण एदे दुट्ठमहुअरा मं एव्व अभिद्दवन्ति । (आत्मानमाघ्राय) भोदु, जाणिदं मए । जं मळअवदीए बन्धुजणेण जामादुअस्स पिअवअस्सोत्ति सबहुमाणं वण्णएहिं विळित्तोह्मि । सन्ताणकुसुमसेहरं च पिणद्धं । एसो अच्चादरो मे अणत्थीभूदो । किं दाणिं एत्थ करिस्सं । अहव एदेण एव मळयवदीए सआसादो ळद्धेण रत्तंसुअजुअळेण इत्थिआ विअ ळंबं ळंबं परिहिअ उत्तरीयकिदावगुण्ठणो गमिस्सं । पेक्खामि दाव दासीएपुत्ता दुट्ठमहुअरा किं करिस्सन्ति त्ति । (तथा करोति ।)

श्रुतं मया प्रियवयस्यः कुसुमाकरोद्यानं गमिष्यतीति । तद्यावत्तत्रैव गमिष्यामि । (परिक्रम्य) **एतदुद्यानं, यावत्प्रविशामि ।** (प्रविश्य भ्रमरसंपातं नाटयन्) **कस्मात्पुनरेते दुष्टमधुकरा मामेवाभिद्रवन्ति ।** (आत्मानमाघ्राय)**भवतु, ज्ञातं मया । यन्मलय-**

(*Enter* Vidūṣaka *with a pair of cloths placed on his shoulder*)

Vidūṣaka. It was heard by me that my dear friend will be going to the flower-garden. Therefore I shall go there only. (*Walking on*) This is the garden. I shall enter. (*Entering and feeling the worry of bees*) Why do these wicked bees attack me alone ? (*Smelling himself*) Let it be. I have known it. I have been cordially besmeared with

वत्या बन्धुजनेन जामातुः प्रियवयस्य इति सबहुमानं वर्णकै- र्विलिप्तोऽस्मि । सन्तानकुसुमशेखरं च पिनद्धम् । एषोऽत्यादरो मेऽनर्थीभूतः । किमिदानीमत्र करिष्यामि । अथवा एतेनैव मलयवत्याः सकाशाल्लब्धेन रक्तांशुकयुगलेन स्त्रीव लम्बं लम्बं परिधाय उत्तरीयकृतावगुण्ठनो गमिष्यामि । पश्यामि तावद्दास्याःपुत्रा दुष्टमधुकराः किं करिष्यन्तीति । (तथा करोति)

विटः—(निरूप्य सहर्षम्) अरे चेडअ (अङ्गुल्या निर्दिश्य सहासम्) एसा खु णोमालिआ अहं चिरस्स आअदो त्ति कुविदा अवगुण्ठणं करिअ अण्णदो गच्छदि । ता कण्ठे गह्णिअ पसादेमि णं ।

(निरूप्य सहर्षम्) अरे चेट (अङ्गुल्या निर्दिश्य सहासम्) एषा खलु नवमालिका अहं चिरस्यागत इति कुपितावगुण्ठनं कृत्वान्यतो गच्छति । तत् कण्ठे गृहीत्वा प्रसादयाम्येनाम् ।

---

sandal-paste by the relatives of Malayavatī for the reason that I am the bridegroom's dear companion. And a wreath of Santāna flowers has also been fastened on my crest. This over-courtesy has become a bane to me. What am I to do now ? Or, I shall walk, clothing myself like a woman with this pair of red cloths got from Malyavatī, hanging down to my heels, and covering my face with my upper cloth. Let me see what the whore's sons of these wicked bees will do ? (*Does so*)

Viṭa. (*Looking, joyfully*) Eh, man ! (*Pointing by the finger and laughing*) Here is Navamālikā who, being angry that I am late, goes the other way, covering her face. Therefore, I shall embrace her

(सहसोपसृत्य कण्ठे गृहीत्वा मुखेन ताम्बूलं दातुमिच्छति ।)

विदूषकः—(मद्यगन्धं सूचयन् नासिकां गृहीत्वा परावृत्तमुखः)

अहं एक्काणं महुअराणं मुहादो कहं वि परिब्भट्टो अण्णस्स दुट्टमहुअरस्स मुहे पडिदो ह्मि ।

अहमेकेषां मधुकराणां मुखात् कथमपि परिभ्रष्टोऽन्यस्य दुष्टमधुकरस्य मुखे पतितोऽस्मि ।

विटः—कहं कोवेण परम्मुहीभूदा । (विदूषकस्य चरणावात्मनः शिरसि कुर्वन्) पसीद णोमालिए पसीद ।

कथं कोपेन पराङ्मुखीभूता । (विदूषकस्य चरणावात्मनः शिरसि कुर्वन्) प्रसीद नवमालिके प्रसीद

(ततः प्रविशति चेटी ।)

चेटी—आणत्तह्मि भट्टिदारिआए मादाए—हञ्जे णोमालिए ! कुसुमाअरुय्याणं गच्छिअ उय्याणपालिअं पल्लविअं भणाहि—अज्ज सविसेसं तमालवीहिअं सज्जीकरेहि । मलयवदीसहिदेण

---

by the neck and appease her. *(Hastily approaching and embracing by the neck, tries to give rolled betel by the mouth)*

Vidūṣaka. (*Feeling the smell of wine, holding tight his nose, with face turned back*) Escaped with difficulty from the mouth of one set of bees, I have fallen into the mouth of another dastardly bee.

Viṭa. How is it she has turned away her face in indignation ? (*Touching Vidūṣaka's feet with his head*) Be pleased, Oh Navamālikā, be pleased.

(*Enter* Servant-maid)

जामादुएण एत्थ आअन्तव्वं त्ति । आणत्ता अ मए पळ्ळविआ । जाव रअणीविरहुक्कण्ठिअं पिअवळ्ळहं सेहरअं अण्णेसामि । (दृष्ट्वा) एसो सेहरओ । (सरोषम्) कहं अण्णं कं पि इत्थिअं पसादेदि ।

आज्ञप्तास्मि भर्तृदारिकाया मात्रा—हञ्जे नवमालिके, कुसुमाकरोद्यानं गत्वोद्यानपालिकां पल्लविकां भण—अद्य सविशेषं तमालवीथिकां सज्जीकुरु । मलयवतीसहितेन जामात्रात्रागन्तव्यमिति । आज्ञप्ता च मया पल्लविका । यावद् रजनीविरहोत्कण्ठितं प्रियवल्लभं शेखरकमन्विच्छामि । (दृष्ट्वा) एष शेखरकः । (सरोषम्) कथमन्यां कामपि स्त्रियं प्रसादयति ।

विटः—

हरिहरपिदामहाणं पि गव्विदो जो ण जाणए णमिदुं ।
सो सेहरओ चळणेसु तुज्झ णोमाळिए पडइ ॥ ३ ॥

हरिहरपितामहानामपि गर्वितो यो न जानाति नन्तुम् ।
स शेखरकश्चरणयोस्तव नवमालिके पतति ॥ ३ ॥

Servant-maid. I have been commanded by the princess's mother—"Maid Navamālikā, go to the flower-garden and tell the garden-keeper Pallavikā—'Keep the avenue of Tamāla trees particularly neat to-day. Our son-in-law is to come there along with Malayavatī.'" Accordingly I have communicated the orders to Pallavikā. I shall just search for my dear lover Śekharaka who will be anxious on account of my separation during the night. (*Seeing*) Here is Śekharaka. (*Indignantly*) How is it, he tries to please some other woman!

Viṭa. That Śekharaka who in his pride does not

विदूषकः—दासीएपुत्त ! मत्तपाळअ ! कुदो एत्थ णोमाळिआ

दास्याःपुत्र मत्तपालक, कुतोऽत्र नवमालिका ।

चेटी—(निरूप्य सस्मितम्) कहं अहं ति करिअ मदपरवसेण सेहरएण अय्यो अत्तेओ पसादीअदि । जाव अळिअकोपं करिअ दुवे वि एदे परिहसिस्सं ।

(निरूप्य सस्मितम्) **कथमहमिति कृत्वा मदपरवशेन शेखरकेण आर्य आत्रेयः प्रसाद्यते । यावदलीककोपं कृत्वा द्वावप्येतौ परिहसिष्यामि ।**

चेटः—(शेखरकं हस्तेन चालयन्)

भट्टक ! मुञ्च मुञ्च । एदं ण होइ णोमाळिआ । एसा खु णोमाळिआ रोशळत्तेहि णअणेहि पेक्खन्ती आअदा ।

भट्टक मुञ्च मुञ्च । एतन्न भवति नवमालिका । एषा खलु नवमालिका रोषरक्ताभ्यां नयनाभ्यां पश्यन्त्यागता ।

---

know to bow even to Hari, Hara and Brahmā, falls at your feet, Oh Navamālikā. (3)

Vidūṣaka. Whore's son, arch-drunkard, where is Navamālikā here ?

Maid-servant. (*Seeing, with a smile*) How is it ? The venerable Ātreya is being appeased by Śekharaka who is under the influence of intoxication mistaking him for me. I shall assume feigned anger and ridicule both of them.

Ceṭa. (*Pushing Śekharaka by the hand*) Master, leave, leave. It is not Navamālikā. Here is Navamālikā come, looking with eyes reddened by rage.

चेटी—(उपसृत्य) सेहरअ ! का णु हु एसा पसादीअदि

(उपसृत्य) शेखरक, का नु खल्वेषा प्रसाद्यते ।

विदूषकः—(अवगुण्ठनमपनीय) अहं मन्दभाआए पुत्तो ।

(अवगुण्ठनमपनीय) अहं मन्दभाग्यायाः पुत्रः ।

विटः—(विदूषकं निरूप्य) अरे कपिळमक्कडअ ! तुवं पि मं सेहरअं परिहसासि । अरे चेडअ, गह्ण इमं । जाव णोमाळिअं पसादेमि ।

(विदूषकं निरूप्य) अरे कपिलमर्कटक त्वमपि मां शेखरकं परिहससि । अरे चेट गृहाणेमम् । यावन्नवमालिकां प्रसादयामि ।

चेटः—जं भट्टओ आणवेदि ।

यद्भट्टक आज्ञापयति ।

विटः—(विदूषकं विमुच्य चेट्याः पादयोः पतन्)

पसीद णोमाळिए पसीद ।

प्रसीद नवमालिके प्रसीद ।

विदूषकः—एसो मे अपक्कमिदुं अवसरो । (पलायितुमीहते ।)

Servant-maid. (*Approaching*) Śekharaka, who is this woman that is being appeased ?

Vidūṣaka. (*Removing the veil*) Myself, the son of an unfortunate mother.

Viṭa. (*Seeing Vidūṣaka*) Oh tawny monkey, you too ridicule me—Śekharaka. Eh peon, seize this man while I beg pardon of Navamālikā.

Ceṭa. As the master commands.

Viṭa. (*Releasing Vidūṣaka and falling at the feet of the maid-servant*) Be pleased, Navamālikā, be pleased.

एष मे अपक्रमितुमवसरः । (पलायितुमीहते ।)

चेटः—(विदूषकं यज्ञोपवीते गृह्णाति । यज्ञोपवीतं त्रुट्यति)

काहिं काहिं कपिळमक्कडअ पळाअशि ।

कस्मिन् कस्मिन् कपिलमर्कटक पलायसे ।

(तदुत्तरीयेण गले बद्ध्वाकर्षति ।)

विदूषकः—होदि णोमाळिए पसीद । मोआवेहि मं ।

भवति नवमालिके प्रसीद । मोचय माम् ।

चेटी—(विहस्य) जदि भूमिए सीसं णिवेसिअ पादेसु मे पडसि ।

(विहस्य) यदि भूम्यां शीर्षं निवेश्य पादयोर्मे पतसि

विदूषकः—(सरोषम्)

कहं राअमित्तं भविअ दासीए धीदे पादेसु दे पडिस्सं ।

कथं राजमित्रं भूत्वा दास्याःपुत्रि पादयोस्ते पतिष्यामि ।

Vidūṣaka. This is the time for me to escape. (*Tries to run*)

Ceṭa. (*Seizes Vidūṣaka by the sacred thread, and it breaks*) Where ? Tawny monkey, where do you run ?

(*Tying his neck with his upper cloth, drags him*)

Vidūṣaka. Madam, Navamālikā, be pleased. Release me.

Maid-servant. (*Laughing*) If, placing your head on the ground, you fall at my feet.

Vidūṣaka. (*With indignation*) Whore's daughter, how shall I, being a friend of the king, fall at your feet ?

चेटी—(अङ्गुल्या तर्जयन्ती सस्मितम्) दाणिं तुमं पाडइस्सं । सेहरअ उट्ठेहि उट्ठेहि । पसण्णा खु अहं । (कण्ठे गृह्णाति) एसो जामादुअस्स पिअवअस्सो तुए खळीकिदो । एदं सुणिअ कदाइ भट्टारओ मित्तावसू कुप्पे । ता आदरेण सम्माणेहि णं ।

(अङ्गुल्या तर्जयन्ती सस्मितम्) इदानीं त्वां पातयिष्यामि । शेखरक उत्तिष्ठोत्तिष्ठ । प्रसन्ना खल्वहम् । (कण्ठे गृह्णाति) एष जामातुः प्रियवयस्यस्त्वया खलीकृतः । एतच्छ्रुत्वा कदाचिद्भट्टारको मित्रावसुः कुप्येत् । तदादरेण संमानयैनम् ।

विटः—जं णोमालिआ आणवेदि । (विदूषकं कण्ठे गृहीत्वा) अज्ज तुमं पिअसम्बन्धिअत्ति करिअ अवहसिदो । (घूर्णयन्) किं सच्चं एव सेहरओ मत्तो, किदो परिहासो । (उत्तरीयं वर्तुलीकृत्यासनं ददाति) इह उवविसदु संबन्धिओ ।

यन्नवमालिकाज्ञापयति । (विदूषकं कण्ठे गृहीत्वा) आर्य त्वं प्रियसंबन्धिक इति कृत्वा अपहसितः । (घूर्णयन्) किं सत्यमेव शेखरको

Maid-servant. (*Threatening by the finger, with a smile*) I will presently make you fall. Śekharaka, get up, get up. I am pleased. (*Embracing him by the neck*) This dear companion of the son-in-law has been slighted by you. On hearing this, Prince Mitrāvasu may get angry. Therefore, treat him with civillity.

Viṭa. As Navamālikā commands. (*Placing his arm round Vidūṣaka's neck*) Sir, you have been made fun of, because you are the bridegroom's dear friend. (*Reeling*) Is it true that Śekharaka is out of his

मत्तः, कुतः परिहासः । (उत्तरीयं वर्तुलीकृत्यासनं ददाति) इहोपविशतु संम्बन्धिकः ॥

विदूषकः—दिट्ठिआ अवअदो विअ से मदवेओ । (उपविशति ।)

दिष्ट्यापगत इवास्य मद्वेगः । (उपविशति ।)

विटः—णोमालिए उवविस तुमं एदस्स पस्सदो, जेण दुवे वि तुह्मे समं सम्माणेमि ।

नवमालिके उपविश त्वमस्य पार्श्वतः, येन द्वावपि युवां समं संमानयामि ।

(चेटी विहस्योपविशति ।)

विटः—चेडअ सुपूरिदं खु एदं चसअं करेहि अच्छसुराए ।

चेटक सुपूरितं खल्वेतच्चषकं कुर्वच्छसुरया ।

(चेटः चषकमुन्नयन् पूरणं नाट्येन करोति ।)

विटः—(स्वशिरःशेखरात् पुष्पाणि गृहीत्वा चषके विन्यस्य जानुभ्यां पतित्वा नवमालिकाया उपनयन्)

---

senses? Nay, it was done for the sake of fun. (*Folds his upper cloth in a circle, and asks him to sit thereon.*) Let the bridegroom's relative sit here.

Vidūṣaka. Fortunately, his intoxication has subsided. (*Sits*)

Viṭa. Navamālikā, sit by his side, so that I may respect both of you together.

(*The servant-maid laughs and sits*)

Viṭa. Peon, make this drinking cup well-filled with pure wine.

(*Ceṭa holds up the cup and fills it by gesture*)

णोमालिए पिबिअ चोक्खिअ देहि एदं ।
नवमालिके पीत्वा चोक्षित्वा देह्येतत् ।

चेटी—(सस्मितम्) जं सेहरओ आणवेदि । (तथा करोति ।)
(सस्मितम्) यच्छेखरक आज्ञापयति । (तथा करोति ।)

विटः—(विदूषकस्य चषकमुपनयन्) एदं णोमालिआमुहसंसग्गवड्ढिअरसं सेहरआदो अण्णेण केण वि अणास्सादिअपुव्वं । ता पिब एदं । किं दे अदो वरं सम्माणं करेमि ।
(विदूषकस्य चषकमुपनयन्) एतन्नवमालिकामुखसंसर्गवर्धितरसं शेखरकादन्येन केनाप्यनास्वादितपूर्वम् । तत् पिबैतत् । किं तेऽतः परं संमानं करोमि ।

विदूषकः—(सविलक्षस्मितं कृत्वा) सेहरअ बह्मणो खु अहं ।
(सविलक्षस्मितं कृत्वा) शेखरक ब्राह्मणः खल्वहम् ।

Viṭa. (Taking flowers from his crest, throwing the same into the cup, falling down on his knees, and offering it to Navamālikā) Navamālikā, drink, purify and hand this back.

Servant-maid. (Smiling) As Śekharaka commands. *(Does so)*

Viṭa. (Offering the cup to Vidūṣaka) This is enhanced in sweetness by the contact of Navamālikā's mouth, and has never been tasted by any except Śekharaka. Therefore drink this. What better courtesy can I do for you ?

***Vidūṣaka.* (*Smiling with embarassment*)** **Śekharaka, am I not a Brahmin ?**

विटः—जइ तुमं बंहणो कहिं दे बंहसुत्तं।
यदि त्वं ब्राह्मणः, क ते ब्रह्मसूत्रम्।

विदूषकः— तं खु इमिणा चेडेण आअड्ढिअमाणं छिण्णं।
तत् खल्वमुना चेटेनाकृष्यमाणं छिन्नम्।

चेटी—(विहस्य) जइ एव्वं, वेदक्खराणि पि कदिइ उदाहर।
(विहस्य) यद्येवं, वेदाक्षराण्यपि कतिचिदुदाहर।

विदूषकः—भोदि सीहुगन्धेण मे वेदक्खराणि णट्ठाणि। अहव, किं मम भोदीए समं विवादेण। एसो बंहणो पादेसु दे पडइ।
भवति सीधुगन्धेन मम वेदाक्षराणि नष्टानि। अथवा, किं मम भवत्या समं विवादेन। एष ब्राह्मणः पादयोस्ते पतति।
(पादयोः पतितुमिच्छति।)

चेटी—(विहस्य हस्ताभ्यां निवार्य) अय्य मा मा एव्वं करेहि। सेहरअ सच्चं बंहणो खु एसो। (विदूषकस्य पादयोः पतति।) अय्य तुए ण कुविदव्वं। सम्बन्धिआणुरूवो परिहासो किदो। सेहरअ तुमं पि इमं पसादेहि।

Viṭa. If you are a Brahmin, where is your sacred string?

Vidūṣaka. It broke, being dragged by this Ceṭa.

Servant-maid. (*Laughing*) If so, repeat some Vedic passage.

Vidūṣaka. Madam, it has been lost through the odour of wine. Or, what is the use of my arguing with you? This Brahmin falls at your feet. (*Tries to fall at her feet*)

(विहस्य हस्ताभ्यां निवार्य) आर्य मा मैवं कुरु । शेखरक सत्यं ब्राह्मणः खल्वेषः । (विदूषकस्य पादयोः पतति ।) आर्य त्वया न कोपितव्यम् । संबन्धिकानुरूपः परिहासः कृतः । शेखरक त्वमपीमं प्रसादय ।

विटः—अहं पि इमं पसादेमि । (विदूषकस्य पादयोर्निपत्य) मरिसेदु मरिसेदु अय्यो, जं मए मदपरवसेण अवरद्धं । जेण अहं णोमालिआए सह आपाणअं गमिस्सं ।

अहमपीमं प्रसादयामि । (विदूषकस्य पादयोर्निपत्य) मर्षयतु मर्षयत्वार्यः, यन्मया मदपरवशेनापराद्धम् । येनाहं नवमालिकया सहापानकं गमिष्यामि ।

विदूषकः—मरिसिदं मए । गच्छ । जाव अहं पि वअस्सं पेक्खामि ।

मर्षितं मया । गच्छ । यावदहमपि वयस्यं पश्यामि ।

विटः—अय्य तह । आय तथा ।

(निष्क्रान्तो नवमालिकया विटश्चेटश्च ।)

Servant-maid. (*Laughing and preventing by her hand*) Sir, no, don't do so. Śekharaka, truly this is a Brahmin. *(Falls at the feet of Vidūṣaka)* Sir, be not angry. I did a fun suited to a bridegroom's relative. Śekharaka, you shall also appease him.

Viṭa. I shall also appease him. *(Falling at the feet of Vidūṣaka)* Pardon, pardon, sir, my guilt due to intoxication, so that I may retire to the tavern along with Navamālikā.

Vidūṣaka. I have pardoned. Go. I shall also see my friend.

Viṭa. Sir, be it so.

विदूषकः—अदिक्कन्दो खु बंह्णस्स अआळमिच्चू । ता अहं पि मत्तवाळअजणसंसग्गदूसिदो इह दिग्घिआअं ह्णाइस्सं । (तथा करोति । पुरोऽवलोक्य) एसो खु पिअवअस्सो रूविणिं विअ वरळच्छिं मळअवादिं ओळम्बिअ इदो एव्व आअच्छदि । ता इह एव्व चिट्ठिस्सं । (स्थितः) ।

अतिक्रान्तः खलु ब्राह्मणस्याकालमृत्युः । तदहमपि मत्तबालकजनसंसर्गदूषित इह दीर्घिकायां स्नास्यामि । (तथा करोति । पुरोऽवलोक्य) एष खलु प्रियवयस्यो रूपिणीमिव वरलक्ष्मीं मलयवतीमवलम्ब्येत एवागच्छति । तदिहैव स्थास्यामि । (स्थितः)

(ततः प्रविशति नायको मलयवत्या विभवतश्च परिवारः ।)

नायकः—

दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवृत्य तिष्ठति बलादालिङ्गिता वेपते ।

(*Exeunt* Navamālikā, Viṭa and Ceṭa)

Vidūṣaka. The Brahmin's untimely death has been tided over. Contaminated that I am through the company of drunken youngsters, I shall bathe in this tank. *(Does so. Looking in front)* Here my dear friend comes to this very place, supporting by the hand Malayavatī who is like Goddess Lakṣmī in human form. Therefore, I shall stand only here. *(Stands)*

(*Enter the* Hero, *with* Malayavatī and suitable retinue)

निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते
जाता वामतयैव मेऽद्य सुतरां प्रीत्यै नवोढा प्रिया ॥४॥

(मलयवतीमवलोक्य) प्रिये मलयवति ।

हुंकारं ददता मया प्रतिवचो यन्मौनमासेवितं
यद्दावानलदीप्तिभिस्तनुरियं चन्द्रातपैस्तापिता ।
ध्यातं यच्च बहून्यनन्यमनसा नक्तंदिनानि प्रिये
तस्यैतत्तपसः फलं मुखमिदं पश्यामि यत्तेऽधुना ॥५॥

नायिका—(अपवार्य) हञ्जे ण केवलं दंसणीओ, पिअं पि भणिदुं जाणादि ।

Hero. Being looked at, she casts her look downwards; being spoken to, she does not speak. In the bed, she remains, turning back; being forcibly embraced, she trembles; while her female friends go out, she longs only to get out of the bedroom. Thus the newly wedded beloved contributes to my supreme pleasure to-day by her very disagreement. (4)

(*Looking at Malayavatī*) Dear Malayavatī,

Silence was observed by me in reply to every statement by the mere addition of Hum; this body has been tortured by the hot rays of the Moon blazing like the wild fire, and meditation has been resorted to with a concentrated mind for many days and nights. Oh beloved, for all that penance, this is the fruit viz., that I now visualize this face of yours. (5)

(अपवार्य) हञ्जे न केवलं दर्शनीयः प्रियमपि भणितुं जानाति ।

चेटी—(विहस्य) अइ पडिपक्खवादिणि ! सच्चं एव एदं । किं एत्थ पिअवअणं ।

(विहस्य) अयि प्रतिपक्षवादिनि सत्यमेवैतत् । किमत्र प्रियवचनम् ।

नायकः— चतुरिके ! आदेशय कुसुमाकरोद्यानस्य मार्गम् ।

चेटी—एदु एदु भट्टिदारओ ।

एत्वेतु भर्तृदारकः ।

नायकः—(परिक्रामन् नायिकां निर्दिश्य) स्वैरं स्वैरम् आगच्छतु भवती ।

खेदाय स्तनभार एव किमु ते मध्यस्य हारोऽपर-
स्ताम्यत्यूरुयुगं नितम्बभरतः काञ्च्यानया किं पुनः ।
शक्तिः पादयुगस्य नोरुयुगलं वोढुं कुतो नूपुरे
स्वाङ्गैरेव विभूषितासि वहसि क्लेशाय किं मण्डनम् ॥६॥

Heroine. (*Aside*) Girl, he is not merely handsome, but he knows also how to speak sweetly.

Maid-servant. (*Laughing*) My dear opposer. indeed it is a fact, not a statement just to please you.

Hero. Caturikā, show the way to the Kusumākara garden.

Servant-maid. Prince, come. Come along.

Hero. *(Advancing and turning towards the Heroine)* Slow. Come slowly.

The weight of breasts itself contributes to the trouble of your waist. Why the necklace in addition ?

चेटी—एदं कुसुमाअरुय्याणं, पविसदु भट्टिदारओ ।
एतत् कुसुमाकरोद्यानं, प्रविशतु भर्तृदारकः ।
(सर्वे प्रविशन्ति ।)

नायकः—(प्रविश्य) अहो ! कुसुमाकरोद्यानस्य श्रीः । इह हि,

निष्यन्दश्चन्दनानां शिशिरयति लतामण्डपे कुट्टिमान्ता-
नाराद्धारागृहाणां ध्वनिमनु कुरुते ताण्डवं नीलकण्ठः ।
यन्त्रोन्मुक्तश्च वेगाच्चलति विटपिनां पूरयन्नालवाला-
नापातोत्पीडहेलाहृतकुसुमरजःपिञ्जरोऽयं जलौघः ॥७॥

Your pair of thighs suffers through the weight of your hips. Why again this girdle ? There is no strength in your feet to bear even your thighs. Why again these anklets ? You are adorned by your own limbs. Why do you wear ornaments for your worry ? (6)

Maid-servant. This is the Kusumākara-garden. Prince, enter.

(*All enter*)

Hero. (*Entering*) Oh, the beauty of the Kusumākara-garden ! For here—

The flow of sandal-juice wets the skirts of the platform in the bower. The peacock dances at the sound of water-fountains near by. This stream of water discharged by the water-machine flows speedily filling the basins at the feet of trees, and becoming yellow by the dust of flowers gently shaken by the dashing of the flow. (7)

अपि च

अमी गीतारम्भैर्मुखरितलतामण्डपभुवः
परागैः पुष्पाणां प्रकटपटवासव्यतिकराः ।
पिबन्तः पर्याप्तं सह सहचरीभिर्मधुरसं
समन्तादापानोत्सवमनुभवन्तीह मधुपाः ॥ ८ ॥

विदूषकः—(उपसृत्य) जेदु भवं । सोत्थि भोदीए ।

(उपसृत्य) जयतु भवान् । स्वस्ति भवत्यै ।

नायकः—वयस्य, चिरादागतोऽसि ।

विदूषकः—भो वअस्स ! लहु एव्व आअदो । किन्दु इअन्तं काळं विवाहमङ्गलूसवमिळिदसिद्धविज्जाहरापाणदंसणकोदूहळेण परिब्भमन्तो ण लक्खिदो । ता पिअवअस्सो वि दाव एदं पेक्खदु ।

भो वयस्य लघ्वेवागतः । किन्तु इयन्तं कालं विवाहमङ्ग-

Moreover,

These bees, making the regions of bowers resound by their musical humming, conspicuously besmeared with scented powder of the pollen of flowers, and drinking honey to their heart's content in the company of their mates, enjoy a drinking party here on all sides. (8)

Vidūṣaka. (*Approaching*) Victory to you, sir. Hail to you, madam.

Hero. Friend, you have come very late.

Vidūṣaka. Oh friend, I came early enough. But I was not seen by you all this time, as I was roaming

लोत्सवमिलितसिद्धविद्याधरापानदर्शनकौतूहलेन परिभ्रमन् न लक्षितः । तत् प्रियवयस्योऽपि तावदेतत् पश्यतु ।

नायकः— यथाह भवान् । (सहर्षं परितः पश्यन्)

दिग्धाङ्गा हरिचन्दनेन दधतः सन्तानकानां स्रजो
माणिक्याभरणप्रभाव्यतिकरैश्चित्रीकृताच्छांशुकाः ।
सार्धं सिद्धगणैर्मधूनि दयितापीतावशिष्टान्यमी
मिश्रीभूय पिबन्ति चन्दनलताच्छायासु विद्याधराः ॥९॥

तदेहि वयमपि तमालवीथिकां गच्छामः ।

(सर्वे परिक्रामन्ति ।)

---

about out of curiosity in witnessing the drinking festivity of the Siddhas and Vidyādharas assembled on the happy occasion of marriage. Therefore, you shall also witness it.

Hero. As you say. (*Joyfully looking round*)

These Vidyādharas with limbs besmeared with sandal, wearing garlands of Santānaka flowers, with their white clothes variegated by the spread of the lustre of their ornaments studded with rubies, accompanied by hosts of Siddhas, and mingling with one another under the shade of sandal plants, drink different kinds of wine after making their spouses drink first. (9)

So come. Let us also go to the avenue of Tamāla trees.

(All walk about)

विदूषकः—एसा खु तमाळवीहिआ । एदं चन्दणळदामण्डवं । एदं च सरदादवपरिखेदिअं विअ तत्तहोदीए वदणं ळक्खीअदि । ता इह फळिअसिळादळे उवविसदु ।

एषा खलु तमालवीथिका । एतच्चन्दनलतामण्डपम् । एतच्च शरदातपपरिखेदितमिव तत्रभवत्या वदनं लक्ष्यते । तदिह स्फटिकशिलातले उपविशतु ॥

नायकः—वयस्य ! सम्यगुपलक्षितम् ।

एतन्मुखं प्रियायाः शशिनं जित्वा कपोलयोः कान्त्या ।
तापाभिताम्रमधुना कमलं ध्रुवमीहते जेतुम् ॥ १० ॥

(मलयवतीं हस्ते गृहीत्वा) प्रिये इहोपविशामः ।

(सर्वे उपविशन्ति ।)

नायकः—(नयिकामुखमुन्नमय्य पश्यन्) प्रिये वृथैव त्वमस्माभिः कुसु-

---

Vidūṣaka. This is the avenue of Tamāla trees. This is the bower of sandal plants. And the face of this revered lady seems jaded by the autumnal Sun. So let her sit on the crystal slab here.

Hero. Friend, well observed by you.

This face of my beloved, having vanquished the Moon by the splendour of her cheeks, and now being ruddy by heat, veritably desires to vanquish the lotus. (10)

(*Taking Malayavatī by the hand*) Dear, we shall sit here.

(*All sit down*)

Hero. (*Raising the face of the Heroine and*

माकरोद्यानदर्शनकुतूहलिभिः परिखेदिता । कुतः,

एतत् ते भ्रूलतोल्लासि पाटलाधरपल्लवम् ।
मुखं नन्दनमुद्यानमतोऽन्यत् केवलं वनम् ॥ ११ ॥

चेटी—(सस्मितं विदूषकं निर्दिश्य) सुदं तुए कहं वण्णिदेत्ति ।

(सस्मितं विदूषकं निर्दिश्य) श्रुतं त्वया कथं वर्णितेति ।

विदूषकः—(सस्मितम्) चउरिए मा एव्वं गव्वं उव्वह । अह्माणं पि मज्झे दंसणीओ जणो अत्थि एव्व । केवळं मच्छरेण कोवि ण वण्णेदि ।

(सस्मितम्) चतुरिके मैवं गर्वमुद्वह । अस्माकमपि मध्ये दर्शनीयो जनोऽस्त्येव । केवलं मत्सरेण कोऽपि न वर्णयति ।

चेटी—(सस्मितम्) अय्य अहं दे वण्णेमि ।

(सस्मितम्) आर्य अहं ते वर्णयामि ।

---

seeing) In vain have you been troubled by us out of our curiosity to witness the Kusumākara-garden. Because—

This face of yours shining with the creepers of your brows, and possessed of the red sprout in the form of your lower lip is the heavenly garden. The other one is only a group of trees. (11)

Maid-servant. (*Towards Vidūṣaka with a smile*) You have heard how she has been described ?

Vidūṣaka. (*With a smile*) Caturikā, don't bear this sort of pride. There are persons, fair to look at, even among us. But out of envy, nobody portrays us like that.

विदूषकः—(सहर्षम्) जीविदह्मि । करेदु होदी पसादं, जेण एसो वुण ण भणादि ईदिसो तादिसो मक्कडाआरत्ति ।

(सहर्षम्) जीवितोऽस्मि । करोतु भवती प्रसादं, येनैष पुनर्न भणति ईदृशस्तादृशो मर्कटाकार इति ।

चेटी—अज्ज तुवं मए विवाहजागरेण णिज्जाअमाणो णिमीळिअच्छो सोहन्तो दिट्ठो । ता एवं एव्व चिट्ठ ।

अद्य त्वं मया विवाहजागरेण निद्रायमाणो निमीलिताक्षः शोभमानो दृष्टः । तदेवमेव तिष्ठ ।

(विदूषकस्तथा करोति ।)

चेटी—(आत्मगतम्) जाव णीळीरसाणुआरिणा तमाळपळ्ळवरसेण मुहं से काळीकरिस्सं ।

(आत्मगतम्) यावन्नीलीरसानुकारिणा तमालपल्लवरसेन मुखमस्य कालीकरिष्यामि ।

Maid-servant. (*With a smile*) Sir, I shall portray you.

Vidūṣaka. (*With joy*) I have come back to life. Madam, do bestow your grace so that this man may not again say that I am this, that or like a monkey.

Maid-servant. To-day you have been seen by me, sleepy on account of wakefulness at the marriage, and shining with closed eyes. So remain like that.

(*Vidūṣaka does so*)

Maid-servant. (*Within*) I shall blacken his face with the juice of Tamāla sprouts resembling the

(उत्थाय पल्लवग्रहणं कृत्वा निष्पीडनं च नाटयति ।)

(नायकौ नायिका च विदूषकस्य मुखं पश्यतः ।)

नायकः—वयस्य धन्यः खल्वसि, यदस्मासु तिष्ठत्सु त्वमेवं वर्ण्यसे ।

(चेटी तमालपल्लवस्य रसेन विदूषकस्य मुखं नाट्येन कालीकरोति ।)

(नायिका सस्मितं विदूषकं दृष्ट्वा नायकं पश्यति ।)

नायकः—

स्मितपुष्पोद्गमोऽयं ते दृश्यतेऽधरपल्लवे ।
फलं तु जातं मुग्धाक्षि पश्यतश्चक्षुषोर्मम ॥ १२ ॥

---

juice of indigo.

(Standing, plucking the sprouts, squeeezes them by gesture)

(The Hero and the Heroine look at the face of Vidūṣaka)

Hero. Friend. you are fortunate inasmuch as you are thus portrayed when we are present.

(The Maid-servant blackens by gesture the face of Vidūṣaka with the juice of Tamāla sprouts)

(The Heroine after seeing Vidūṣaka with a smile sees the Hero)

Hero. O lady possessed of pretty eyes, the flower of smile is seen to bud forth from your sprout-like lower lip, whereas the fruit has been produced in the eyes, with which I see. **(12)**

विदूषकः—भोदि किं दे किदं । भवति किं ते कृतम् ।

चेटी—णं वण्णिदो सि । ननु वर्णितोऽसि ।

विदूषकः—(हस्तेन मुखं परामृज्य हस्तं दृष्ट्वा सरोषं दण्डकाष्ठमुद्यम्य ससंरम्भम्) दासीए धीदे राअउळं खु एदं । किं दे करिस्सं । (नायकमुद्दिश्य) भो तुह्माणं पुरदो एव्व अहं दासीए धीदाए खळीकिदोह्मि । किं मम इह ट्ठिदेण । अण्णदो गमिस्सं । (निष्क्रान्तः ।)

(हस्तेन मुखं परामृज्य हस्तं दृष्ट्वा सरोषं दण्डकाष्ठमुद्यम्य ससंरम्भम्) दास्याः पुत्रि राजकुलं खल्वेतत् । किं ते करिष्यामि । (नायकमुद्दिश्य) भोः युष्माकं पुरत एवाहं दास्या धीतया खलीकृतोऽस्मि । किं ममेह स्थितेन । अन्यत्र गमिष्यामि । (निष्क्रान्तः।)

चेटी—कुविदो खु मम अय्यो अत्तेओ । जाव गदुअ पसादेमि ।

कुपितः खलु मम आर्य आत्रेयः । यावद्गत्वा प्रसादयामि ।

नायिका—हञ्जे चउरिए कहं मं एआइणिं उज्झिअ गच्छसि ।

Vidūṣaka. Madam, what have you done ?

Maid-servant. Surely you have been portrayed.

Vidūṣaka. *(Rubbing the face with his hand, looking at it, raising his stick indignantly, and hurriedly)* Whore's daughter, is this not a royal house ? How shall I deal with you ? (*Addressing the Hero*) Oh, in your very presence I have been damned by this whore's daughter. Why should I remain here ? I shall go elsewhere. (*Exit*)

Maid-servant. The revered Ātreya has indeed become angry with me. I shall just go and please him.

हञ्जे चतुरिके कथं मामेकाकिनीमुज्झित्वा गच्छसि ।

चेटी—(नायकमुद्दिश्य सस्मितम्) एवं एव चिरं एआइणी होहि ।

(नायकमुद्दिश्य सस्मितम्) एवमेव चिरमेकाकिनी भव ।

(निष्क्रान्ता ।)

नायकः—

दिनकरकरामृष्टं बिभ्रद् द्युतिं परिपाटलां
दशनकिरणैरुत्सर्पद्भिः स्फुटीकृतकेसरम् ।
अयि मुखमिदं मुग्धे सत्यं समं कमलेन ते
मधु मधुकरः किन्त्वेतस्मिन् पिबन्न विभाव्यते ॥ १३ ॥

(नायिका विहस्य मुखमुन्नमयति ।)

(नायको दिनकरेति तदेव पठति ।)

(प्रविश्य)

चेटी—(सहसोपसृत्य) एसो खु सिद्धजुअराओ मित्तावसू केण वि

Heroine. Girl Caturikā, how do you go, leaving me alone ?

Maid-servant. (*With a smile at the Hero*) May you long remain alone in this very same manner.

(*Exit*)

Hero. Being touched by the beams of the Sun and bearing the rosy lustre and conspicuously provided with filaments, as it were, through the effulgent rays of the teeth, O charming lady, this face of yours is truly like a lotus. But the bee is not seen here drinking honey. (13)

(*The Heroine, laughing, raises her face*)

The king again repeats the verse—'Being touched-.'

कज्जन्तरेण कुमारं पेक्खिदुं आअदो ।

(सहसोपसृत्य) एष खलु सिद्धयुवराजो मित्रावसुः केनापि कार्यान्तरेण कुमारं प्रेक्षितुमागतः ।

नायकः—प्रिये गच्छ त्वमात्मनो गृहम् । अहमपि मित्रावसुं दृष्ट्वा त्वरिततरमागत एव ।

(चेटीसहिता निष्क्रान्ता नायिका । ततः प्रविशति मित्रावसुः ।)

मित्रावसुः—

अनिहत्य तं समर्थः कथमिव जीमूतवाहनस्याहम् ।
कथयिष्यामि तव हृतं राज्यं रिपुणेति निर्लज्जः ॥१४॥

तथाप्यनिवेद्यायुक्तरूपं गमनमिति निवेद्य गच्छामि । (उपसर्पति ।)

(*Enter*)

Maid-servant. (*Approaching suddenly*) This Siddha prince, Mitrāvasu, has come to see the prince on some other business.

Hero. Dear, go home. I am also coming speedily soon after seeing Mitrāvasu.

(*Exit the Heroine along with the Maid-servant*)

(*Enter* Mitrāvasu)

Mitrāvasu. How shall I, being powerful and without killing the enemy, tell Jīmūtavāhana shamelessly 'Your kingdom has been captured by your foe?' (14)

However, because it is improper to start without informing him, I shall inform him and go.

(*Approaches*)

नायकः—मित्रावसो इह आस्यताम् ।

(मित्रावसुरुपविशति ।)

नायकः—ससंरम्भ इव लक्ष्यसे ।

मित्रावसुः—कः खलु मतङ्गहतके संरम्भः ।

नायकः—किं कृतं मतङ्गेन ।

मित्रावसुः—स्वनाशाय युष्मदीयं किल राज्यमाक्रान्तम् ।

नायकः—(सहर्षमात्मगतम्) अपि नाम सत्यमेतत् स्यात् ।

मित्रावसुः—तदुच्छित्तये मामाज्ञापयतु कुमारः । किं बहुना,

संसर्पद्भिः समन्तात् कृतसकलवियन्मार्गयानैर्विमानैः
कुर्वाणाः प्रावृषीव स्थगितरविरुचः श्यामतां वासरस्य ।

Hero. Mitrāvasu, take your seat here.

(*Mitrāvasu sits*)

Hero. You seem to be excited.

Mitrāvasu. What excitement towards the wretched Mataṅga ?

Hero. What was done by Mataṅga ?

Mitrāvasu. Your kingdom has been overrun by him for his own ruin.

Hero. (*Joyfully within*) I would like this to be true.

Mitrāvasu. Prince, give me orders for his extinction. Why say more ?

These Siddhas darkening the day where the rays of the Sun are intercepted, as though in winter, by aerial chariots emerging in all directions and

इते याताश्च सद्यस्तव वचनमितः प्राप्य युद्धाय सिद्धाः
सिद्धं चोद्वृत्तशत्रुक्षयभयविनमद्राजकं ते स्वराज्यम् ॥१५॥

अथवा किं बलौघैः ।

एकाकिनापि हि मया रभसावकृष्ट-
निस्त्रिंशदीधितिसटाभरभासुरेण ।
आरान्निपत्य हरिणेव मतङ्गजेन्द्र-
माजौ मतङ्गहतकं हतमेव विद्धि ॥ १६ ॥

नायकः—(कर्णौ पिधाय आत्मगतम्) हहह दारुणमभिहितम् । अथवा एवं तावत् । (प्रकाशं सस्मितम्) मित्रावसो कियदेतत् । बहुतरमतोऽपि बाहुशालिनि त्वयि संभाव्यते । किन्तु,

---

flying over the entire path of the sky, are at once starting for battle on receiving your word. And your own kingdom has been recovered, the host of kings bowing down in fear by reason of the annihilation of your haughty foe. (15)

Or, where is the need for forces ?

Know the wretched Mataṅga as having been pounced upon and already slain in battle by me alone shining through the halo, like unto a lion's thick mane, of my suddenly drawn sword as a lordly elephant would be by a lion. (16)

Hero. *(Closing his ears, within)* Ha! Ha! Ha! Cruel is the statement. Or, I shall say like this. (*Aloud, with a smile*) Mitrāvasu, how little is this? Much more is possible of you with your

स्वशरीरमपि परार्थे यः खलु दद्यामयाचितः कृपया ।
राज्यस्य कृते स कथं प्राणिवधक्रौर्यमनुमन्ये ॥ १७ ॥

अपिच क्लेशान् विहाय शत्रुबुद्धिरेव मे नान्यत्र । यदि तेऽस्मत्प्रियं कर्तुमीहा, तदनुकम्प्यतामसौ क्लेशदासीकृतस्तपस्वी ।

मित्रावसुः—(सामर्षं सहासं च) कथं नानुकम्प्यते, यादृशोऽसावस्माकमुपकारी कृपणश्च ।

नायकः—(आत्मगतम्) प्रत्यग्रकोपाक्षिप्तचेतास्तावदसौ न शक्यते निवर्तयितुम् । तदेवं तावत् । (प्रकाशम्) मित्रावसो उत्तिष्ठ । अभ्यन्तरमेव प्रविशावः । तत्र च त्वां बोधयिष्यामि । संप्रति परिणतमहः । तथाहि—

---

mighty arm. But—

When I would give away my very body for the sake of others unasked out of pity, how shall I approve of the cruelty of slaughter for the sake of a kingdom ? (17)

Moreover, I don't treat anybody as an enemy except passions. If you desire to please me, let this unfortunate man who is a slave of passions be pitied.

Mitrāvasu. (*With anger and with laughter*) How will he not be pitied when he is our benefactor and deserves our sympathy ?

Hero. (*To himself*) He can't be dissuaded, while his mind is thus provoked by fresh anger. So I shall say like this. (*Aloud*) Mitrāvasu, get

निद्रामुद्रावबन्धव्यतिकरमनिशं पद्मकोशादपास्य-
न्नाशापूरैककर्मप्रवणनिजकरप्रीणिताशेषविश्वः ।
दृष्टः सिद्धैः प्रसक्तस्तुतिमुखरमुखैरस्तमप्येष गच्छ-
न्नेकः श्लाघ्यो विवस्वान् परहितकरणायैव यस्य प्रयासः ॥
॥ १८ ॥

(निष्क्रान्तौ)

तृतीयोऽङ्कः ।

---

up. We shall go in. There I shall explain to you. Now the day has drawn to a close. Accordingly—

Removing for ever from the lotus-bud the close grip due to slumber (the seal of idleness from the Padma treasury,)—pleasing the entire world by means of his beams (hands) solely bent upon spreading over the distant extremities (fulfilling its desires,)—and seen by the sages (siddhas) whose mouths are noisy by songs of praise just begun, this one Sun, even while setting, is praiseworthy, whose endeavour is all for doing good to others. (18)

(*Exeunt*)

End of the Third Act.

अथ चतुर्थोऽङ्कः ।

(ततः प्रविशति गृहीतवस्त्रयुगलः काञ्चुकीयः प्रतीहारश्च ।)

काञ्चुकीयः—

अन्तःपुराणां विहितव्यवस्थः
पदे पदेऽहं स्खलितानि रक्षन् ।
जरातुरः संप्रति दण्डनीत्या
सर्वं नृपस्यानुकरोमि वृत्तम् ॥ १ ॥

प्रतीहारः—आर्य क नु खलु भवान् प्रस्थितः ।

काञ्चुकीयः—आदिष्टोऽस्मि देव्या मित्रावसोर्जनन्या । यथा—कञ्चुकिन् त्वया दशरात्रं यावन्मलयवत्या जामातुश्च रक्तवासांसि

ACT THE FOURTH

(*Enter* Chamberlain *taking a pair of cloths and* the Doorkeeper)

Chamberlain—Managing the affairs in the harem and guarding myself against slipping at every footstep by leaning on a stick, afflicted, as I am, by old age, I now follow the entire conduct of a king (who declares rules applicable to cities, who at every stage prevents offences and who regulates his conduct by the science of politics.) (1)

Doorkeeper. Sir, where have you started ?

Chamberlain. I have been commanded by the queen, mother of Mitrāvasu thus:—'Chamberlain,

नेतव्यानीति । कुत्र प्रथमं गच्छामि । राजसुता च श्वशुरकुले वर्तते । जीमूतवाहनोऽपि युवराजेन मित्रावसुना सह समुद्रवेलां द्रष्टुमद्य गत इति मया श्रुतम् । तन्न जाने किं मलयवत्याः समीपं गच्छाम्युताहो जामातुरिति ।

प्रतीहारः—आर्य, वरं राजपुत्र्याः समीपगमनम् । तत्र हि कदाचिदियत्या वेलया जामाता प्रत्यागतो भविष्यति ।

काञ्चुकीयः—सुनन्द, साधूक्तम् । भवता पुनः क गम्यते ।

प्रतीहारः—अहमपि महाराजविश्वावसुना समादिष्टः । यथा—सुनन्द, गच्छ, मित्रावसुं ब्रूहि—अस्मिन् दिवसे प्रतिपदुत्सवे

---

for ten days red clothes must be taken by you to Malayavatī and the son-in-law.' Where shall I go first ? The princess remains in her father-in law's house. It is heard by me that Jīmūtavāhana also has gone to-day along with Prince Mītrāvasu to visit the sea-shore. So, I don't know whether to go first to Malayavatī or to the son-in-law.

Doorkeeper. Sir, it is better to go to the princess. There perhaps by this time the son-in-law will have returned from the sea-shore.

Chamberlain. Sunanda, well said. But where are you going ?

Doorkeeper. I too have been commanded by Emperor Viśvāvasu thus : 'Sunanda, go, and tell Mitrāvasu—'Come and decide upon something suited to this happy occasion to be presented to Malayavatī

मलयवत्या जामातुश्चैतदुत्सवानुरूपं किंचिदागत्य निरूपयति तद्गच्छतु राजपुत्र्याः सकाशमार्यः । अहमपि मित्रावसोराह्वानाय गच्छामि ।

(निष्क्रान्तौ ।)

विष्कम्भकः ।

(ततः प्रविशति नायको मित्रावसुश्च ।)

नायकः —

शय्या शाद्वलमासनं शुचिशिला सद्म द्रुमाणामधः
शीतं निर्झरवारि पानमशनं कन्दाः सहाया मृगाः ।
इत्यप्रार्थितलभ्यसर्वविभवे दोषोऽयमेको वने
दुष्प्रापार्थिनि यत्परार्थघटनावन्ध्यैर्वृथा स्थीयते ।। २ ।।

---

and the son-in-law in the Sthālipāka festival to-day.' Hence sir, go to the princess. I too shall go for calling Mitrāvasu.

(Exeunt)

INTERLUDE

(*Enter the* Hero *and* Mitrāvasu)

Hero. The meadow is the bedding, the clean slab is the seat, under the trees is the residence, the cool water of rills is the drink, roots are the food and animals are the companions. Thus does the forest yield all luxuries voluntarily. But being beyond the easy access of beggars, there is this one fault in it viz., people remain there in vain without being of use to others. (2

मित्रावसुः—(ऊर्ध्वमवलोक्य) कुमार त्वर्यतां त्वर्यताम् । समयोऽयं चलितुमम्बुराशेः ।

नायकः—(आकर्ण्य) सम्यगुपलक्षितम् ।

उद्गर्जज्जलकुञ्जरेन्द्ररभसास्फालानुबद्धोद्धतः
सर्वाः पर्वतकन्दरोदरभुवः कुर्वन् प्रतिध्वानिनीः ।
उच्चैरुच्चरति ध्वनिः श्रुतिपथोन्माथी यथायं तथा
प्रायः प्रेङ्खदसङ्ख्यशङ्खवलया वेलेयमागच्छति ॥ ३ ॥

मित्रावसुः—कुमार, नन्वागतैव । पश्य—

कवलितलवङ्गपल्लवकरिमकरोद्गारसुरभिणा पयसा ।
एषा समुद्रवेला रत्नद्युतिरञ्जिता भाति ॥ ४ ॥

Mitrāvasu. (*Seeing above*) Prince, hurry, hurry. It is time for the sea to ebb.

Hero. (*Listening*) Well observed.

This tide carrying innumerable heaps of conches moving to and fro is coming in such a manner that its (this) loud noise combining with and consequently heightened by the impetuous dash (by the trunks) of huge, roaring water-elephants and making all the interior regions of caves on the mountain send forth echoes swells up high, deafening the ears. (3)

Mitrāvasu. Prince, it has actually come. Behold—

This tide of the Ocean, adorned by the glitter of gems shines with water which is fragrant through the belching of elephants and whales having

नायकः—मित्रावसो पश्य शरत्समयपाण्डुभिः पयोदपटलैः प्रावृताः प्रालेयाचलशिखरश्रियमुद्वहन्त्यचलसानवः ।

मित्रावसुः—कुमार नैवामी मलयसानवः । नागानामस्थिसङ्घाताः खल्वेते ।

नायकः—(सोद्वेगम्) कष्टं, किन्निमित्तं पुनरमी सङ्घातमृत्यवो जाताः ।

मित्रावसुः—कुमार कुमार नैवामी सङ्घातमृत्यवः ।

नायकः—मित्रावसो किमन्यत् ।

मित्रावसुः—श्रूयतां — पुरा किल स्वपक्षपवनापास्तसागरजलस्तरसा रसातलादुद्धृत्य भुजङ्गमाननुदिनमाहारयति स्म वैनतेयः ।

---

chewed the tender leaves of clove-plants. (4)

Hero. Mitrāvasu, see. The hill-tops covered with rows of clouds that are white by reason of the autumn, bear the beauty of the tops of the Himālayas.

Mitrāvasu. Prince, these are not the summits of the Malaya. These are heaps of bones of Nāgas (serpents.)

Hero. (With uneasiness of mind) Pity ! Why did these deaths in batches take place ?

Mitrāvasu. Prince, prince, these are not deaths in batches.

Hero. Mitrāvasu, what else is it ?

Mitrāvasu. Let it be heard. In days of yore,

नायकः—(सोद्वेगम्) कष्टम्, अतिदुष्करं करोति । ततस्ततः ।

मित्रावसुः—ततः सकलनागलोकविनाशशङ्किना नागराजेन गरुत्मानभिहितः ।

नायकः—(सादरम्) किं मां भक्षयेति ।

मित्रावसुः—नहि नहि ।

नायकः—किमन्यत् ।

मित्रावसुः—इदमुक्तं —त्वदभिसंपातत्रासात् सहस्रशः स्रवन्ति भुजङ्गाङ्गनानां गर्भाः । शिशवश्च पञ्चत्वमुपयान्ति । एवं च सन्ततिसमुच्छेदादस्माकं तवैव स्वार्थहानिर्भवेद्, यदर्थमभिपतति भवान्

Garuḍa, driving away the water of the Ocean by the force of wind-blasts produced by his wings, preyed daily upon snakes after lifting them suddenly from the Nether-world.

Hero. (*With agony*) Pity, he does a thing which no one would stoop to do. Then ?

Mitrāvasu. Then Garuḍa was told by the king of serpents, who apprehended the ruin of the entire race of serpents.

Hero. (*Affectionately*) 'Devour me'—is it ?

Mitrāvasu. No, no.

Hero. What else ?

Mitrāvasu. He said this—'Out of fear from your onslaught, the embryoes of female snakes are lost in abortion by thousands. The babies also meet with death. In the result, on account of the extinction

पातालम् । तदेकैकं भुजङ्गमानामनुदिवसं समुद्रतटस्थितस्याहमेव प्रेषयिष्यामीति । प्रतिपन्नं च तत् पक्षिराजेन ।

इत्येकशः प्रतिदिनं विहितव्यवस्थो
यान् भक्षयत्यहिपतीन् पतगाधिराजः ।
यास्यन्ति यान्ति च गताश्च दिनैर्विवृद्धिं
तेषाममी तुहिनशैलरुचोऽस्थिकूटाः ॥ ५ ॥

नायकः—कष्टं, रक्षिताः किलैवं नागराजेन पन्नगाः ।

जिह्वासहस्रद्वितयस्य मध्ये नैकापि सा तस्य किमस्ति जिह्वा ।
एकाहिरक्षार्थमहिद्विषोऽद्य दत्तो मयात्मेति यया ब्रवीति ॥ ६ ॥

---

of our race it is your object that is lost, for which you invade the Nether-world. Therefore, I shall myself send you daily one snake while you remain at the sea-shore.' And this was agreed to by the king of birds.

These heaps of bones bearing the similarity of the snow-peaked mountain,—bones of the flower of serpents whom the king of birds devours every day having thus fixed up his bargain, are bound to increase, they do increase, nay, they have already increased day by day. (5)

Hero. O pity ! Snakes have been only thus saved by the king of serpents !

In the midst of his two thousand tongues, is there not even one tongue by which he will say 'For the protection of one snake to-day, my own self is

आश्चर्यमाश्चर्यम् ।

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।
शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥ ७ ॥

कष्टम्, अनवसानेयं विपत्तिर्नागानाम् । (आत्मगतम्) अपि नाम शक्नुयामहं स्वशरीरदानादेकस्यापि फणभृतः परिरक्षां कर्तुम् ।

(ततः प्रविशति प्रतीहारः ।)

प्रतीहारः—आरूढोऽस्मि गिरिशिखरम् । (विलोक्य) अये मित्रावसुर्जामातुः समीपे वर्तते । यावदुपसर्पामि । (उपसृत्य प्रणम्य) विजयेतां कुमारौ ।

मित्रावसुः—सुनन्द किन्निमित्तमिहागमनम् ।

---

sacrificed to the enemy of snakes'? (6)

Wonder! Wonder!

For the sake of the filthy body which is a storehouse of all impurities, which is ungrateful and which is perishable, fools commit sins. (7)

Pity. This calamity of snakes is endless! *(To himself)* Shall I be able, by offering my body, to save at least one serpent?

(Enter the Doorkeeper*)*

Doorkeeper. I have got up the summit of the hill. *(Looking)* Eh! Mitrāvasu is by the side of the son in-law. I shall just go near. *(Going near, saluting)* Victory to both the princes.

Mitrāvasu. Sunanda, for what reason is your arrival here?

प्रतीहारः—(कर्णे) एवम् ।

मित्रावसुः—कुमार तातो मामाह्वयते ।

नायकः—गम्यताम् ।

मित्रावसुः—कुमारेणापि बहुप्रत्यवायेऽस्मिन् प्रदेशे कुतूहलान्न चिरं स्थातव्यम् ।

(निष्क्रान्तो मित्रावसुः प्रतीहारश्च ।)

नायकः—यावदहमपि गिरिशिखरादवतीर्य समुद्रतटमवलोकयामि ।

(परिक्रामति ।)

(नेपथ्ये)

हा पुत्तअ सङ्खचूळ कहं वावादिअमाणो किळ अज्ज तुवं मए पेक्खिदव्वो ।

हा पुत्र शङ्खचूड कथं व्यापाद्यमानः किलाद्य त्वं मया द्रष्टव्यः ।

Doorkeeper. (In the ear) Just so.

Mitrāvasu. Prince, my father calls me.

Hero. Go.

Mitrāvasu. Prince, you too ought not to remain long out of curiosity in this place which is attended by very many dangers.

(Exeunt Mitrāvasu and the Doorkeeper)

Hero. I shall also just get down from the top of the hill and look at the sea-shore.

(*Walks forward*)

(*Behind the scenes*)

Ah son! Śaṅkhacūḍa, how are you to be seen by me to-day being killed?

नायकः—(आकर्ण्य) अये योषित इवार्तप्रलापः । तद् यावदुपेत्य केयं कुतोऽस्या भयकारणमिति स्फुटीकरोमि । (परिक्रामति ।)

(ततः प्रविशति क्रन्दन्त्या वृद्धयानुगम्यमानः शङ्खचूडो गोपायितवस्त्रयुगलः किङ्करश्च ।)

वृद्धा—(सास्रम्) हा पुत्तअ सङ्खचूळ कहं वावादिअमाणो किळ अज्ज तुवं मए पेक्खिदव्वो । (चिबुके गृहीत्वा) इमिणा मुखचन्देण विरहिदं अन्धआरीभविस्सदि पाआळं ।

(सास्रम्) हा पुत्रक शङ्खचूड कथं व्यापाद्यमानः किलाद्य त्वं मया प्रेक्षितव्यः । (चिबुके गृहीत्वा) अनेन मुखचन्द्रेण विरहितमन्धकारीभविष्यति पातालम् ।

शङ्खचूडः—अम्ब किमेवमतिविक्लवा सुतरामात्मानं पीडयसि ।

वृद्धा—(निर्वर्ण्य पुत्रस्याङ्गान्यामृशन्ती) हा पुत्तअ कहं दे अदिट्टसूरसु-

---

Hero. (*Listening*) Eh! It seems to be the bewailment of a woman.

So I will just go near and ascertain who is she and whence is the cause of her fear.

(*Walks forward*)

(*Enter* Śaṅkhacūḍa *followed by an* Old lady *crying aloud, and a* Servant *hiding a païr of cloths*)

Old lady. (*Shedding tears*) Ah son, Śaṅkhacūḍa, how are you to be seen by me to-day being killed ? (*Catching his chin*) Being deprived of this Moon-like face, the Nether-world will be all darkness.

Śaṅkhacūḍa. Mother, being so extremely unnerved, why do you worry yourself ?

उमारं सरीरं णिग्घिणहिअओ गलुळो आहारयिस्सदि ।

हा पुत्रक कथं ते अदृष्टसूर्यसुकुमारं शरीरं निर्घृणहृदयो गरुड आहारयिष्यति । (कण्ठे गृहीत्वा रोदिति ।)

शङ्खचूडः—अम्ब अलमलं परिदेवितेन । पश्य—

क्रोडीकरोति प्रथमं जातं नित्यमनित्यता ।
धात्रीव जननी पश्चात्तदा शोकस्य कः क्रमः ॥ ८ ॥

वृद्धा—हा पुत्तअ चिट्ठ । मुहुत्तअं पि दाव वदनं दे पेक्खिस्सं ।

हा पुत्रक तिष्ठ । मुहूर्तमपि तावद्वदनं ते प्रेक्षिष्ये ।

किंकरः—एहि कुमाळ । किं तव एताए भणन्तीए । पुत्तशिणेहमोहिदा क्खु एशा ण ळाअकज्जं जाणादि ।

एहि कुमार किं तवैतया भणन्त्या । पुत्रस्नेहमोहिता खल्वेषा न राजकार्यं जानाति ।

Old lady. (*Seeing aud gently rubbing the limbs of her son*) Ah ! Son ! How will the cruel-hearted Garuḍa prey upon your tender body that has never seen the light of the Sun?

(*Weeps, embracing him by the neck*)

Śaṅkhacūḍa. Mother, enough, enough of lamentation. See—

Transitoriness first takes hold of a person born, always like a nurse. Afterwards does the mother. Then where is the justification for grief ? (8)

Old lady. Ah son, stop for a moment at least. I shall see your face.

Servant. Come, prince, what is the use of her

शङ्खचूडः—भद्र अयमहमागच्छामि ।

किङ्करः—(आत्मगतम्) आणीदो क्खु मए वज्झशिळासमीवं शङ्खचूळो । जाव एदं वज्झचिण्हं ळत्तंसुअजुअळं दइअ वज्झसिळं दंशेमि ।

(आत्मगतम्) आनीतः खलु मया वध्यशिलासमीपं शङ्खचूडः । यावदेतद् वध्यचिह्नं रक्तांशुकयुगलं दत्त्वा वध्यशिलां दर्शयामि ।

नायकः—अये इयमसौ योषित् । (शङ्खचूडं दृष्ट्वा) नूनमनेनाप्यस्याः सुतेन भवितव्यं, यदर्थमाक्रन्दति । (समन्तादवलोक्य) न खलु पुनः किञ्चिद् भयकारणं पश्यामि । तत् कुतोऽस्य भयं भविष्यतीति किमुपेत्य पृच्छामि । अथवा प्रसक्त एवायमालापः । कदाचिदित एव व्यक्तिर्भविष्यति । तद् विटपान्तरितस्तावच्छृणोमि ।

किङ्करः—(सास्रं कृताञ्जलिः) कुमाळ शङ्खचूळ एशो शामिणो आदे-

---

talking to you? Being blinded by love for her son, she certainly does not realise the duty to the king.

Śaṅkhacūḍa. Good man, here I am coming.

Servant. (*Within*) Śaṅkhacūḍa has been brought by me near the slaughter-stone. I shall give him this pair of red cloths which is the victim's sign, and show him the slaughter-stone.

Hero. Eh! This is the lady. (*Looking at Śaṅkhacūḍa*) Certainly this must also be her son whom she laments. (*Looking all round*) But I don't see any cause for fear. Therefore, may I go near and ask whence is his fear? Or, the talk is going on. Perhaps from this itself it will be made clear. So I shall hear, hidden by the tree.

शो त्ति कळिअ ईदिशं पि णिट्ठुळं मन्तीअदि ।

(सास्रं कृताञ्जलिः) कुमार शङ्खचूड एष स्वामिन आदेश इति कृत्वेदशमपि निष्ठुरं मन्त्र्यते ।

शङ्खचूडः—भद्र कथय ।

किङ्करः—णाअळाओ वाशुई आणवेदि ।

नागराजो वासुकिराज्ञापयति ।

शङ्खचूडः—(शिरस्यञ्जलिं कृत्वा सादरम्) किं मामाज्ञापयति स्वामी ।

किङ्करः—एदं ळत्तंसुअजुअळं पळिहिअ आळोह वज्झशिळं, जेण ळत्तंशुअचिण्होवळक्खिदं गळुळो गण्हिअ आहाळकळणाअ णइश्शदि ।

एतद् रक्तांशुकयुगलं परिधायारोह वध्यशिलां, येन रक्तांशुकचिह्नोपलक्षितं गरुडो गृहीत्वाऽऽहारकरणाय नेष्यति ।

Servant. (Weeping and joining the palms of his hands in respect) Prince Śaṅkhacūḍa, in view of the fact that it is His Highness's command you are informed of such a harsh thing.

Śaṅkhacūḍa. Good man, say.

Servant. Vāsuki, the king of serpents, commands.

Śaṅkhacūḍa. (Raising the united palms of his hands on his head, courteously) What does His Highness command me ?

Servant. Wearing this pair of red cloths, climb up this slaughter-stone so that Garuḍa may seize you distinguished by the mark of red cloths and take you for his prey.

नायकः—(सास्रम्) कष्टमसौ वासुकिना परित्यक्तस्तपस्वी ।

किङ्करः—शङ्खचूळ गण्ह् एदं । (वस्त्रयुगलमर्पयति ।)

शङ्खचूड गृहाणैतत् । (वस्त्रयुगलमर्पयति)

शङ्खचूडः—(सादरम्) उपनय (इति गृहीत्वा शिरसि स्वाम्यादेशमर्पयति ।)

वृद्धा—(पुत्रहस्ते वाससी दृष्ट्वा सोरस्ताडनं) हा वच्छ एदं क्खु तं वज्झ-चिण्हं वसणं, जेण भाएदि मे हिअअं । (मोहमुपगता ।)

(पुत्रहस्ते वाससी दृष्ट्वा सोरस्ताडनं) हा वत्स एतत् खलु तद्वध्य-चिह्नं वसनं, येन बिभेति मे हृदयम् । (मोहमुपगता ।)

किङ्करः—आशण्णा क्खु गळुळस्स आगमणवेळा । ता ळहु अव-क्कमामि ।

आसन्ना खलु गरुडस्यागमनवेला । तल्लघ्वपक्रामामि ।

(निष्क्रान्तः ।)

शङ्खचूडः—अम्ब समाश्वसिहि । समाश्वसिहि ।

Hero. (*With tears*) Miserable! This unfortunate man has been forsaken by Vāsuki.

Servant. Śaṅkhacūḍa, take this.

(*Hands over the pair of cloths*)

Śaṅkhacūḍa. (*Tenderly*) Give me. (*Takes and receives the king's command by his head*)

Old lady. (*Seeing the pair of cloths in her son's hand and beating her breast*) Oh child, this is the cloth which is the victim's sign at which my heart trembles. (*Swoons*)

Servant. The time for Garuḍa's arrival is nearing. So I shall get away soon. (*Exit*)

वृद्धा—(समाश्वस्य, सास्रं) हा जाद हा पुत्तअ हा मणोरहसदलद्ध कहिं तुमं पुणो पेक्खिस्सं। (कण्ठे गृहीत्वा रोदिति।)

(समाश्वस्य सास्रं) हा जात हा पुत्रक हा मनोरथशतलब्ध कुत्र त्वां पुनः प्रेक्षिष्ये। (कण्ठे गृहीत्वा रोदिति।)

नायकः—(सास्रम्) अहो नैर्घृण्यं गरुत्मतः। अपिच

मूढाया मुहुरश्रुसन्ततिमुचः कृत्वा प्रलापान् बहून्
कस्त्राता मम पुत्रकेति कृपणं दिक्षु क्षिपन्त्या दृशम्।
अङ्के मातुरुपाश्रितं शिशुमिमं त्यक्त्वा घृणामश्नत-
श्चञ्चुर्नैव खगाधिपस्य हृदयं वज्रेण मन्ये कृतम् ॥९॥

शङ्खचूडः—(अम्बाया अश्रूणि परिमार्जयन्) अम्ब! अलमलं वैक्लव्येन।

Śaṅkhacūḍa. Mother, take heart. Take heart.

Old lady. (*Getting consoled and weeping*) Oh child, Oh son, you were got as a result of hundreds of my dreams. Where shall I again see you?

(Embracing him in the neck, weeps)

Hero. (*With tears*) Oh! How merciless is Garuḍa! Moreover—

I think the heart is made of adamant, not the beak, of the lord of birds, who leaving off mercy, devours this child leaning on the lap of his mother who, having lost her senses, frequently sheds showers of tears after lamenting aloud in many ways and who pitiably casts her glance in different directions, crying out—'Oh son, who will be my saviour?' (9)

ननु समाश्वसिहि समाश्वसिहि ।

वृद्धा—(सास्रम्) पुत्तअ ! कहं समस्ससिमि । किं एकपुत्तो त्ति किदाणुकम्पेण णिवत्ताविदो सि णाअराएण । हा कदन्तहदअ । कहं दाणिं तुए णिग्घणहिअएण एव्वं वित्थिण्णे जीवलोए मम पुत्तओ एव्व सुमरिदो । सव्वहा हदह्मि मन्दभाइणी । (मूर्च्छां नाटयति।)

(सास्रम्) पुत्रक कथं समाश्वसिमि । किमेकपुत्र इति कृतानुकम्पेन निवर्तितोऽस्मि नागराजेन । हा कृतान्तहतक । कथमिदानीं त्वया निर्घृणहृदयेनैवं विस्तीर्णे जीवलोके मम पुत्रक एव स्मृतः । सर्वथा हतास्मि मन्दभागिनी । (मूर्च्छां नाटयति ।)

नायकः—

आर्तं कण्ठगतप्राणं परित्यक्तं स्वबान्धवैः ।
त्राये नैनं यदि ततः कः शरीरेण मे गुणः ॥ १० ॥

Saṅkhacūḍa. (*Wiping off his mother's tears*) Mother enough, enough of losing heart. Take courage. Be consoled.

Old lady. (*Crying*) Son, how shall I take courage ? Have you been let off by the king of serpents, taking pity that you are my only son ? Ah ! Wretched death ! How was my son alone in this vast world thought of by you with a cruel heart ? By all means I am lost. Unfortunate that I am. (*Gesticulates swooning*)

Hero. If I don't save this man who is distressed, whose life lingers in his throat, and who has been abandoned by his kinsmen, of what use is

तद् यावदुपसर्पामि ।

शङ्खचूडः—अम्ब संस्तम्भयात्मानम् ।

वृद्धा—हा पुत्तअ । संखचूळ दुल्ळहो सत्थंभो । जदा एव्व णाअळोअपरिरक्खएण वासुइणा सअं परिच्चत्तोसि तदा को दे परित्ताणं करिस्सदि ।

हा पुत्रक शङ्खचूड दुर्लभः संस्तम्भः । यदैव नागलोकपरिरक्षकेण वासुकिना स्वयं परित्यक्तोऽसि, तदा कस्ते परित्राणं करिष्यति ।

नायकः—(उपसृत्य) **नन्वयमहम् ।**

वृद्धा—(ससंभ्रममुत्तरीयेण पुत्रमाच्छाद्य नायकमुपसृत्य) गळुळ विणदाणन्दण वावादेहि मं । अहं दे आहारणिमित्तं परिकप्पिदा ।

(ससंभ्रममुत्तरीयेण पुत्रमाच्छाद्य नायकमुपसृत्य) **गरुड विनतानन्दन व्यापादय माम् । अहं ते आहारनिमित्तं परिकल्पिता ।**

---

this body to me ? (10)

So I shall just go near.

Śankacūḍa. Mother, control yourself.

Old lady. Ah son, Śaṅkhacūḍa, control is impossible. When you have been abandoned by Vāsuki himself, the protector of the serpent-world, who then will offer you protection ?

Hero. (*Going near*) Of course I do.

Old lady. (*Hurriedly covering her son with her apron and approaching the Hero*) Oh Garuḍa, son of Vinatā, kill me. I have been assigned for your food.

नायकः—(सास्रम्) अहो पुत्रवात्सल्यम् ।

अस्या विलोक्य मन्ये पुत्रस्नेहेन विक्लवत्वमिदम् ।
अकरुणहृदयः करुणां कुर्वीत भुजङ्गशत्रुरपि ॥ ११ ॥

शङ्खचूडः—अम्ब अलमलं त्रासेन । न खल्वयं नागशत्रुः । पश्य,

महाहिमस्तिष्कविभेदमुक्त-
रक्तच्छटाचर्चितचण्डचञ्चुः ।
क्वासौ गरुत्मान् क्व च नाम सोम-
सौम्यस्वभावाकृतिरेष साधुः ॥ १२ ॥

वृद्धा—हा पुत्तअ अहं पुण तुज्झ मरणभीदा सव्वं एव गरुळमअं पेक्खामि ।

हा पुत्रक अहं पुनस्तव मरणभीता सर्वमेव गरुडमयं पश्यामि ।

Hero. (*With tears*) Oh the love of son!

Seeing this abjectness of her due to the love of son, even the cruel-hearted foe of serpents will take pity. (11)

Śaṅkhacūḍa. Mother, don't fear. Don't fear. This person is not the foe of serpents. See—

Where is Garuḍa with his fierce beak besmeared with streams of blood issuing from the broken heads of big serpents, and where is this noble man whose personality is as gentle in nature as the Moon? (12)

Old lady. Ah son, but I, being afraid of your death, see Garuḍa in everything.

नायकः—अम्ब मा भैषीः । नन्वयमहं विद्याधरः, त्वत्सुतसंरक्षणार्थमेवायातः ।

वृद्धा—(सहर्षम्) पुत्तअ पुणो पुणो एव्वं भण ।

(सहर्षम्) पुत्रक पुनः पुनरेवं भण ।

नायकः—अम्ब किमनेन पुनः पुनरभिहितेन । कर्मणैव संपादयामि ।

वृद्धा—(शिरस्यञ्जलिं कृत्वा) पुत्तअ चिरं जीव ।

(शिरस्यञ्जलिं कृत्वा) पुत्रक चिरं जीव ।

नायकः—

ममैतदम्बार्पय वध्यचिह्नं प्रावृत्य यावद् विनतात्मजाय ।
पुत्रस्य ते जीवितरक्षणार्थं स्वं देहमाहारयितुं ददामि ॥ १३ ॥

वृद्धा—(कर्णौ पिधाय) पडिहदं खु एदं । तुमं पि मे संखचूडणिव्विसेसो पुत्तओ एव्व । अहव संखचूडादो अहिअदरो, जो एव्वं

Hero. Mother, don't fear. Here I am a Vidyādhara, come for protecting your son..

Old lady. (*With joy*) Son, again and again say like this.

Hero. Mother, what is the use of saying it over and over ? I shall do it by deed.

Old lady. (*Placing the united palms of her hands on her head*) Son, may you live long.

Hero. Madam, give me this victim's sign so that, covering myself with it, I may offer my body for food to Garuḍa for saving your son's life. (13)

बन्धुजणपरिच्चत्तं मे पुत्तअं सरीरप्पदाणेण रक्खिदुं इच्छसि ।

(कर्णौ पिधाय) प्रतिहतं खल्वेतत् । त्वमपि मे शङ्खचूडनिर्विशेषः पुत्रक एव । अथवा शङ्खचूडादधिकतरः, य एवं बन्धुजनपरित्यक्तं मम पुत्रकं शरीरप्रदानेन रक्षितुमिच्छसि ।

शङ्खचूडः—(सस्मितम्) अहो जगद्विपरीतमस्य महासत्त्वस्य चरितम् । कुतः,

विश्वामित्रः श्वमांसं श्वपच इव पुराभक्षयद् यन्निमित्तं
नाडीजङ्घो विजघ्ने कृततदुपकृतिर्यत्कृते गौतमेन ।
पुत्रोऽयं काश्यपस्य प्रतिदिनमुरगानत्ति तार्क्ष्यो यदर्थं
प्राणांस्तानेव चित्रं तृणमिव कृपया यः परार्थे जहाति॥१४॥

(नायकमुद्दिश्य) भो महात्मन् । दर्शिता त्वयेयमात्मप्रदानाध्यवसाया-

---

Old lady. (*Shutting her ears*) Let this be forbidden. You are also my son on a par with Śaṅkhacūḍa. Nay, you are more so than Śaṅkhacūḍa—you who thus desire to protect my son abandoned by his kinsmen by the sacrifice of your body.

Śaṅkhacūḍa (*With a smile*) Oh! How strange is this great man's conduct, (For—)

Who strangely gives away out of pity for the sake of another that very life for the sake of which Viśvāmitra of old ate the flesh of a dog like a Caṇḍāla, the life for which the bird Nāḍījaṅgha was killed by Gāutama though he had rendered help, and for which this son of Kāśyapa, Garuḍa, devours snakes daily. (14)

निर्व्याजा मयि दयालुता । तदलमनेन निर्बन्धेन । कुतः,

जायन्ते च म्रियन्ते च मादृशाः क्षुद्रजन्तवः ।
परार्थे बद्धकक्षाणां त्वादृशामुद्भवः कुतः ॥ १५ ॥

तत् किमनेन । मुच्यतामयमध्यवसायः ।

नायकः—(शङ्खचूडं हस्ते गृहीत्वा) कुमार । शङ्खचूड । न मे चिरा-लब्धावसरस्य परार्थसंपादनमनोरथस्यान्तरायं कर्तुमर्हति भवान् । (पादयोः पतित्वा) तदलं विकल्पेन । दीयतां वध्यचिह्नम् ।

शङ्खचूडः—भो महासत्त्व किमनेन वृथाप्रयासेन । न खलु शङ्खचूडः शङ्खधवलं शङ्खपालकुलं मलिनीकरिष्यति । अथ ते वयमनुक-

---

(Towards the Hero) Oh high-souled man, by your resolution to sacrifice yourself, your genuine sympathy for me has been shown. Therefore don't press this. For—

Low beings like myself come into existence and pass away. Where is the birth of persons like yourself who are pledged to help others ? (15)

So what is the use of this ? Let this resolution be given up.

Hero. (Taking Śaṅkhacūḍa by the hand) Lad Śaṅkhacūḍa, you ought not to thwart my ambition to help others, the occasion for which has arisen after a long time. *(Falling at his feet)* Don't take it amiss. Let the victim's sign be given.

Śaṅkhacūḍa. Oh great-souled man, why this futile attempt ? Śaṅkhacūḍa will never blacken the

म्पनीयाः, तदियमस्मद्विपत्तिविक्लवा यथा न परित्यजति जीवितमम्बा, तथाभ्युपायश्चिन्त्यताम् ।

नायकः—किमत्र चिन्त्यते । चिन्तित एवाभ्युपायः । स तु त्वदायत्तः ।

शङ्खचूडः—कथमिव ।

नायकः—

म्रियते म्रियमाणे या त्वयि जीवति जीवति ।
तां यदीच्छसि जीवन्तीं रक्षात्मानं ममासुभिः ॥ १६ ॥

अयमभ्युपायः । तदर्पय त्वरितं वध्यचिह्नम् । यावदनेनात्मानमाच्छाद्य वध्यशिलामारोहामि । त्वमपि जननीं पुरस्कृत्यास्माद् देशान्नि-

---

race of Śaṅkhapāla which is as pure as a conch. If you really take sympathy on us, then find out a way so that our mother will not give up her life oppressed by grief due to our death.

Hero. What is to be found out here ? It has already been found out, but it depends on you.

Śaṅkhacūḍa. How ?

Hero. If you want your mother alive who dies when you die and lives when you live, save yourself through my life. (16)

This is the way. So hand over the victim's sign soon, so that I shall cover myself with it and ascend the slaughter-stone; and you, placing your mother in front, shall return from this place. Perhaps if she

वर्तस्व । कदाचिदियमालोक्यैव सन्निकृष्टमाघातस्थानं स्त्रीसहभुवा कातरत्वेनाम्बा प्राणान् जह्यात् । किञ्च न पश्यति भवान् इदं विपन्नपन्नगानेककङ्कालसंकुलं महाश्मशानम् । तथाहि—

चञ्चच्चञ्चूद्धृतार्धच्युतपिशितलवग्रासंसंवृद्धगर्धै-
र्गृध्रैरारब्धपक्षद्वितयविधुतिभिर्बद्धसान्द्रान्धकारे । [वाना-
वक्त्रोद्वान्ताः पतन्त्यश्छिमिति शिखिशिखाश्रेणयोऽस्मिञ्शि
मास्त्रस्रोतस्यजस्रस्रुतबहलवसावासविस्रे स्वनन्ति ॥ १७ ॥

शङ्खचूडः—कथं न पश्यामि ।

---

were to see the place of slaughter near her, she might lose her life through timidity characteristic of women. Moreover don't you see this big cemetary which abounds in the numerous bones of the deceased snakes ? Accordingly—

The rows of the flames of fire emitted by the mouths of jackals make the noise 'chim, chim', falling in this place which is rendered pitch-dark by vultures spreading their both wings and rapaciously longing to take back the bits of flesh fallen half-way while being lifted by their active beaks and which is possessed of the repugnant smell of the marrow which is always flowing largely into the stream of blood. (17)

Śaṅkhacūḍa. How don't I see ?

प्रतिदिनमशून्यमहिनाहारेण विनायकाहितप्रीति ।
शशिधवलास्थिकपालं वपुरिव रौद्रं श्मशानमिदम् ॥ १८॥

तद् गच्छ । किमेभिस्त्रासनोपायैः । आसन्नः खलु गरुडस्यागमनसमयः । (मातुरग्रतो जानुभ्यां स्थित्वा शिरोनिहिताञ्जलिः) अम्ब त्वमपि निवर्तस्वेदानीम् ।

समुत्पत्स्यामहे मातर्यस्यां यस्यां गतौ वयम् ।
तस्यां तस्यां प्रियसुते माता भूयास्त्वमेव नः ॥ १९ ॥

(पादयोः पतति ।)

वृद्धा— (सास्रम् आत्मगतम्) कहं पच्छिमं से वअणं । (प्रकाशम्)

This cemetary which daily supplies a snake for food and gives satisfaction to the lord of birds and which abounds in skulls, white like the Moon, resembles Rudra's body which is always shining by the snake-garland, which affords pleasure to God Vināyaka and which is possessed of skulls rendered doubly white by the Moon. (18)

Hence go. What is the use of all this frightening? Imminent is the arrival of Garuḍa. *(Kneeling before his mother and placing the united palms of his hands on his head)* Mother, you shall also return now.

Whichever birth we shall take, Oh mother so fond of your son, may you be our mother therein. (19)

(Falls at her feet)

पुत्तअ तुमं उज्झिअ अण्णदो मे पाआ ण पसरन्ति । ता तुए सह गमिस्सं ।

(सास्रम् आत्मगतम्) कथं पश्चिममस्य वचनम्। (प्रकाशम्) पुत्रक त्वामुज्झित्वाऽन्यत्र मे पादौ न प्रसरतः । तत् त्वया सह गमिष्यामि ।

शङ्खचूडः—(उत्थाय) यावदहमपि नातिदूरे भगवन्तं दक्षिणगोकर्णं प्रदक्षिणीकृत्य स्वाम्यादेशमनुतिष्ठामि ।

(उभौ निष्क्रान्तौ ।)

नायकः—कष्टम् । न संपन्नमभिलषितम् । तत् कोऽत्राभ्युपायः ।

(सहसा प्रविश्य)

काञ्चुकीयः—इदं वासोयुगलम् ।

नायकः—(दृष्ट्वा सहर्षमात्मगतम्) दिष्ट्या सिद्धमभिवाञ्छितमने-

Old lady. *(Weeping, to herself)* How this last word of his? *(Aloud)* Son, my feet do not travel elsewhere, leaving you behind. So let me also go with you.

Śaṅkhacūḍa. (*Standing*) I shall also obey my master's command after devoutly walking round the Lord presiding over the southern Gokarṇa who is not far off.

(*Exeunt both*)

Hero. Pity! Unfulfilled is my ambition. Then, what is the remedy?

(*Entering suddenly,* Chamberlain)

Chamberlain. This pair of cloths.

नातर्कितोपनतेन रक्तांशुकयुगलेन ।

काञ्चुकीयः--इदं वासोयुगलं देव्या मित्रावसोर्जनन्या कुमाराय प्रेषितम् । परिधत्तां कुमारः ।

नायकः—उपनय ।

(काञ्चुकीय उपनयति ।)

नायकः—(गृहीत्वाऽऽत्मगतम्) सफलीभूतो मे मलयवत्याः पाणिग्रहणविधिः । (परिधाय प्रकाशम्) कञ्चुकिन् गम्यताम् । मद्वचनादभिवादनीया देवी ।

काञ्चुकीयः—यदाज्ञापयति कुमारः । (निष्क्रान्तः ।)

नायकः — वासोयुगमिदं रक्तं प्राप्तकाले ममागतम् ।
करोति महतीं प्रीतिं परार्थं देहमुज्झतः ॥ २० ॥

Hero. (*Looking, joyfully, to himself*) Fortunately my desire is fulfilled by this pair of red cloths got accidentally.

Chamberlain. This pair of cloths has been sent to the prince by the queen, the mother of Mitrāvasu. Prince, wear it.

Hero. Bring it.

(*Chamberlain gives*)

Hero. (*Receiving, to himself*) My taking the hand of Malayavatī has borne fruit. (*Wearing the cloths*) (*Aloud*) Chamberlain, go. Communicate my respects to the queen.

Chamberlain. As the prince commands. [*Exit*

Hero. This pair of red cloths having come at

(दिशो विलोक्य) यथायं चलितमलयाचलशिखरशिलासञ्चयः प्रचण्डो नभस्वांस्तथा तर्कयामि आसन्नीभूतः पक्षिराज इति । अपिच—

तुल्याः संवर्तकाभ्रैः पिदधति गगनं पङ्क्तयः पक्षतीनां
तीरं वेगान्निरस्तं क्षिपति भुव इव प्लावनायाम्बु सिन्धोः ।
कुर्वन् कल्पान्तशङ्कां सपदि च सभयं वीक्षितो दिग्द्विपेन्द्रै-
र्देहोद्योतो दशाशाः कपिशयति शिशुद्वादशादित्यदीप्तिः॥

तद् यावदसौ नागच्छत्येव शङ्खचूडः, तावत् त्वरिततरमिमां वध्यशिलामारोहामि । (तथा कृत्वोपविश्य स्पर्शं नाटयन्) अहो स्पर्शोऽस्याः—

---

the proper time gives great pleasure to me who am leaving my body for the sake of another. (20)

(*Looking at the different quarters*) Inasmuch as the wind blows fiercely, shaking the heaps of stones on the top of Mount Malaya, I infer that the king of birds is very near. Moreover—

The rows of wings resembling the clouds of deluge envelop the sky. The water of the sea propelled by speed outruns the shore as though for drowning the Earth. The dazzle of the body eclipsing the dazzle of the twelve Suns reddens all the ten quarters, rousing suspicions of deluge and being looked at with fear by the elephants in charge of the extremities. (21)

So by the time that Śaṅkhacūḍa does not come, I shall get up this slaughter-stone hastily. (*So doing, sitting and betraying the happiness of touch*) Oh

न तथा सुखयति मन्ये मलयवती मलयचन्दनरसार्द्रा ।
अभिवाञ्छितार्थसिद्धयै वध्यशिलेयं यथा स्पृष्टा ॥२२॥

अथवा किं मलयवत्या ।

शयितेन मातुरङ्के विस्रब्धं शैशवे न तत् प्राप्तम् ।
लब्धं सुखं मयास्या वध्यशिलाया यदुत्सङ्गे ॥ २३ ॥

तदयमागत एव गरुत्मान् । यावदात्मानमाच्छाद्य तिष्ठामि ।
(तथा करोति)

(ततः प्रविशति गरुडः ।)

गरुडः—एष भोः ।

क्षिप्त्वा बिम्बं हिमांशोर्भयकृतवलयां संहरन् शेषमूर्तिं
सानन्दं स्यन्दनाश्वत्रसनविचलिते पूष्णि दृष्टोऽग्रजेन ।

---

the touch of this (stone) !

I think, Malayavatī, wet with the sandal juice of Malaya, does not delight me so much as does this slaughter-stone touched for the realisation of my desire. (22)

Nay, why speak of Malayavatī ?

The joy which is felt by me while seated on the surface of this slaughter-stone was not securd by me while reposing on the lap of my mother confidently in my boyhood. (23)

This Garuḍa is already come. So I shall remain covering myself. (*Does so*)

(*Enter* Garuḍa)

Garuḍa. Halloh !

एष प्रान्तावसज्जज्जलधरपटलात्यायतीभूतपक्षः
प्राप्तो वेलामहीध्रं मलयमहमहिग्रासगृध्नुः क्षणेन ॥२४॥

नायकः—

संरक्षता पन्नगमद्य पुण्यं मयार्जितं यत् स्वशरीरदानात् ।
भवे भवे तेन ममैवमेव भूयात् परार्थः खलु देहलाभः ॥

गरुडः—(नायकं निर्वर्ण्य)

अस्मिन् वध्यशिलातले निपतितं शेषानहीन् रक्षितुं
निर्भिद्याशनिदण्डचण्डतरया चञ्च्वाधुना वक्षसि ।

Having brushed aside the disc of the Moon and contracted the body of Śeṣa folded in circles out of fear, being seen with joy by my elder brother while the Sun is shaken by the quaking of the horses of his chariot, and with my wings projected far by rows of clouds gathering at their edges, I have come in a moment to the mountain on the sea-shore—the Malaya, eager to devour the snake. (24)

Hero. Through the virtue which is acquired by me by offering my own body in the protection of the snake, may the same happen to me in every birth. The acquisition of body is certainly for the service of others. (25)

Garuḍa. (*Seeing the Hero*)

I shall now, with a view to eating, suddenly lift the snake that lies motionless on this surface of the slaughter-stone in order to protect the rest of

भोक्तुं भोगिनमुद्धरामि तरसा रक्ताम्बरप्रावृतं
दिग्धं मद्भयदीर्यमाणहृदयप्रस्यन्दिनेवासृजा ॥ २६ ॥

(अभिपत्य नायकं गृह्णाति । नेपथ्यात् पुष्पाणि पतन्ति । दुन्दुभिध्वनिश्च । ऊर्ध्वं दृष्ट्वाऽऽकर्ण्य च) अये पुष्पवृष्टिर्दुन्दुभिध्वनिश्च ।

आमोदानन्दितालिर्निपतति किमियं पुष्पवृष्टिर्नभस्तः
स्वर्गे किं वैष चक्रं मुखरयति दिशां दुन्दुभीनां निनादः ।

(विहस्य)

आ ज्ञातं सोऽपि मन्ये मम जवमरुता कम्पितः पारिजातः
सार्धं संवर्तकाभ्रैरिदमपि रसितं जातसंहारशङ्कैः ॥ २७ ॥

---

the serpents, and who, being covered with red cloaks, appears as if besmeared with blood gushing forth from his heart rent to pieces out of fear for me, after piercing him in his heart with my beak which is more frightful than the thunderbolt. (26)

(*Coming down upon the Hero, seizes him*)

(*Flowers fall, and drums beat behind the scenes*)

Garuḍa. (*Looking above and listening*) Eh the shower of flowers and the beat of drums!

Why does this shower of flowers fall from the sky, delighting the bees by its fragrance ? And why does this beat of drum fill the different quarters with sounds in the heavens ? (*Laughing*)

नायकः—(आत्मगतम्) दिष्ट्या कृतार्थोऽस्मि ।
गरुडः—(कलयन्)

नागानां रक्षिता भाति गुरुरेष यथा मम ।
तथा सर्पाशनाशङ्कां व्यक्तमद्यापनेष्यति ॥ २८ ॥

तद् यावदहं मलयशिखरमारुह्य यथेष्टमाहारयामि ।

(नायकं गृहीत्वा निष्क्रान्तः ।)

चतुर्थोऽङ्कः ।

Oh ! I see. I think even that Pārijāta tree has been shaken by the blast produced by my speed, and this is the thunder of the clouds of deluge in a body which suspect the advent of the deluge. (27)

Hero. (*Within*) Fortunately I have realised my ambition.

Garuḍa. (*Feeling the weight*)

Inasmuchas this saviour of the remaining snakes appears to be heavy, I am sure that he will fully satisfy my craving for the eating of snakes. (28)

So I shall get up the summit of the Mount Malaya, and feed on him as best it pleases me.

(*Taking hold of the Hero, Exit*)

The End of the Fourth Act.

अथ पञ्चमोऽङ्कः ।

(ततः प्रविशति प्रतिहारः ।)

प्रतिहारः—

> स्वगृहोद्यानगतेऽपि स्निग्धे पापं विशङ्क्यते स्नेहात् ।
> किमु दृष्टबह्वपायप्रतिभयकान्तारमध्यस्थे ॥ १ ॥

तथाहि—जलनिधिवेलावलोकनकुतूहली निष्क्रान्तः कुमारो जीमूतवाहनश्चिरयतीति दुःखमास्ते महाराजो विश्वावसुः । समादिष्टश्चास्मि तेन । यथा—सुनन्द श्रुतं मया सन्निहितगरुडप्रतिभयमुद्देशं गतो जामाता जीमूतवाहनस्तत्र चिरयतीति शङ्कित इवास्म्यनेन

ACT THE FIFTH

(*Enter* Doorkeeper)

Doorkeeper. An evil is apprehended for a friend out of attachment though he remains in the garden of his own house. What then, when he is in the midst of the forest frightful by the existence of many visible dangers ? (1)

Accordingly, Emperor Viśvāvasu feels miserable, because Prince Jīmūtavāhana who went forth out of curiosity to see the sea-shore makes delay (in returning.) I have been ordered by him thus:—'Sunanda, I heard that my son-in-law Jīmūta-

वृत्तान्तेन । त्वरिततरं विदित्वागच्छ— किमसौ स्वगृहं गतो वा न वेति । तद् यावत् तत्रैव गच्छामि । (परिक्रामन्नग्रतो दृष्ट्वा) अये अयमसौ जीमूतवाहनस्य पिता जीमूतकेतुरुटजाङ्गणे सहधर्मचारिण्या वध्वा मलयवत्या पर्युपास्यमानस्तिष्ठति । तथाहि—

क्षौमे भङ्गवती तरङ्गितदशे फेनाम्बुतुल्ये वहन्
जाह्नव्येव विराजितः सवयसा देव्या महापुण्यया ।
धत्ते तोयनिधेरयं सुसदृशीं जीमूतकेतुः श्रियं
यस्यैषान्तिकवर्तिनी मलयवत्याभाति वेला यथा ॥ २ ॥

---

vāhana has gone to the spot which is dreaded by reason of the presence of Garuḍa. Now that he delays, I grow apprehensive on account of this news. Quickly ascertain whether or no he has gone home, and return.' So I shall go there only. (*Walking forward and seeing in front*) Eh! Here is Jīmūtaketu, the father of Jīmūtavāhana, who remains being attended to by his wife and his daughter-in-law Malayavatī in the courtyard of his cottage.

Accordingly—Putting on a pair of white silken cloths which is painted with designs and waving at the skirts and resembling the foamy water, shining by the side of his most virtuous queen of suitable age as by the side of the Ganges, this Jīmūtaketu bears the beauty exactly similar to that of the Ocean, in whose vicinity there shines Malayavatī like the shore on which Mount Malaya stands. (2

तदुपसर्पामि ।

(ततः प्रविशत्यासनस्थः पत्नीवधूसमेतो जीमूतकेतुः ।)

जीमूतकेतुः—

भुक्तानि यौवनसुखानि यशो विकीर्णं
राज्ये स्थितं स्थिरधिया चरितं तपोऽपि ।
श्लाघ्यः सुतः सुसदृशान्वयजा स्नुषेयं
चिन्त्यो मया ननु कृतार्थतयाद्य मृत्युः ॥ ३ ॥

प्रतिहारः—(सहसोपसृत्य) जीमूतवाहनस्य ।

जीमूतकेतुः—(कर्णौ पिधाय) शान्तं शान्तं पापम् ।

देवी—पडिहदं खु अमंगळवअणं । प्रतिहतं खल्वमङ्गलवचनम् ।

Let me therefore go near.

(*Enter* Jīmūtaketu *seated, along with his* wife *and* daughter-in-law)

Jīmūtaketu. The pleasures of youth had been enjoyed by me, and fame made to spread. I had wielded the royal sceptre. Penance also has been performed by me with a steady mind. I have a praiseworthy son, and this daughter-in law born of the best suited parentage. Now that my purpose in life has been served, it is of course time for me to think of death.

Doorkeeper. (*Approaching suddenly*) Of Jīmūtavāhana.

Jīmūtaketu. (*Shutting his ears*) Peace, peace.

Queen. Let the ominous utterance be stultified.

मलयवती—इमिणा दुण्णिमित्तेण वेवदी विअ मे हिअअं।

अनेन दुर्निमित्तेन वेपत इव मे हृदयम्।

जीमूतकेतुः—भद्र किं जीमूतवाहनस्य।

प्रतिहारः—जीमूतवाहनस्य वार्तामन्वेष्टुं महाराजविश्वावसुना युष्मदन्तिकं प्रेषितोऽस्मि। तदाज्ञापयतु महाराजः किं मया स्वामिनो विज्ञापनीयमिति।

जीमूतकेतुः—किमसन्निहितस्तत्रापि मे वत्सः।

देवी—(सविषादम्) महाराअ जइ तहिं पि णत्थि, ता कहिं दाणिं गओ मे पुत्तओ, जेण एव्वं चिराअदि।

(सविषादम्) **महाराज यदि तत्रापि नास्ति, तत केदानीं गतो मम पुत्रकः, येनैवं चिरयति।**

जीमूतकेतुः—नियतमस्मत्प्राणयात्रार्थं दूरं गतो भविष्यति।

Malayavatī. My heart trembles, as it were, at this bad omen.

Jīmūtaketu. Good sir, what of Jīmūtavāhana?

Doorkeeper. To find out the news of Jīmūtavāhana, I have been sent to you by Emperor Viśvāvasu. Therefore let Your Highness command—What should be made known to my master?

Jīmūtaketu. Is my child absent there also?

Queen. (*With grief*) Your Highness, if he is not there also, then where is my son gone, by reason of which he delays?

Jīmūtaketu. Certainly, for our sustenance he would have gone far.

मलयवती—(सविषादमात्मगतम्) अहं पुण मुहुत्तअं पि अय्यउत्तं अपेक्खन्ती अण्णं एव्व किं वि आसंकामि ।

(सविषादमात्मगतम्) अहं पुनर्मुहूर्तकमप्यार्यपुत्रमपश्यन्त्यन्यदेव किमप्याशङ्के ।

प्रतिहारः—आज्ञापयतु किं मया स्वामिनो विज्ञापनीयम् ।

जीमूतकेतुः—(वामाक्षिस्पन्दनं सूचयन्) जीमूतवाहनश्चिरयतीति मय्याकुले विचिन्तयति—

स्फुरसि किमदक्षिणेक्षण मुहुर्मुहुः कथयितुं ममानिष्टम् ।
हतचक्षुरपहतं ते स्फुरितं मम पुत्रकः कुशली ॥ ४ ॥

(ऊर्ध्वं पश्यन्) अयमेव मे भुवनैकचक्षुर्भगवान् सहस्रदीधितिः स्फुरन् जीमूतवाहनस्य श्रेयः करिष्यति । (सविस्मयम्)

Malayavatī. (*With sorrow, within*) I, for my part, not seeing my husband, apprehend something quite different.

Doorkeeper. Please order what is to be intimated by me to my master ?

Jīmūtaketu. (*Feeling the throb of his left eye*) When I am thinking in perturbation for the reason that Jīmūtavāhana delays—

Oh left eye, why do you throb frequently to tell me some undesirable thing ? Oh wretched eye, your throbbing is valueless. My son is safe. (4)

(*Seeing above*) This, my lord, the Sun who is the only eye of the world will confer prosperity on Jīmūtavāhana. (*With wonder*)

आलोक्यमानमतिलोचनदुःखदायि
रक्तच्छटा निजमरीचिरुचो विमुञ्चत् ।
उत्पातकालतरलीकृततारकाभ-
मेतत् पुरः पतति किं सहसा नभस्तः ॥ ५ ॥

कथं चरणयोरेव पतितम् ।

(सर्वे निरूपयन्ति ।)

जीमूतकेतुः—अये लग्नसरसमांसकेशश्चूडामणिः । कस्य पुनरयं भविष्यति ।

देवी—(सविषादम) पुत्तअस्स विअ मे एदं चूडारअणं ।
(सविषादम्) पुत्रकस्येव मे एतच्चूडारत्नम् ।

मलयवती—मा एवं भण । मैवं भण ।

प्रतिहारः—महाराज मा अविज्ञायैवं विक्लबो भूः । अत्र हि—

What is this that suddenly falls from the sky in front which being seen gives extreme pain to the eyes, which sends forth streams of blood, having the likeness of its own rays and which resembles a star disturbed from its position by the advent of the deluge. (5)

How, fallen at my own feet! (*All gaze*)

Jīmūtaketu. Eh, a crest-jewel with wet flesh and hair clinging to it. Whose will it be ?

Queen. (*With grief*) It looks like the crest-gem of my son.

Malayavatī. Don't say so.

ताक्ष्र्येण भक्ष्यमाणानां पन्नगानामनेकशः ।
उल्कारूपाः पतन्त्येते शिरोमणय ईदृशाः ॥ ६ ॥

जीमूतकेतुः—देवि सोपपत्तिकमभिहितमनेन । कदाचिदेवमपि स्यात् ।

देवी—सुणन्द अवि णाम कदाइ एत्तिआए वेळाए सोसुरउळं एव्व गदो मे पुत्तओ भविस्सदि । ता गच्छ, जाणिअ ळहुं एव्व अह्माणं णिवेदेहि ।

सुनन्द अपि नाम कदाचिदेतावत्या वेलया श्वशुरकुलमेव गतो मे पुत्रको भविष्यति । तद् गच्छ, ज्ञात्वा लघ्वेवास्माकं निवेदय ।

प्रतिहारः—यदाज्ञापयति देवी । (निष्क्रान्तः ।)

जीमूतकेतुः—देवि अपि नाम नागचूडामणिरयं भवेत् ।

Doorkeeper. Your Highness, don't lose heart thus without knowing. For here—

Such-like head-gems of the snakes that are being devoured by Garuḍa fall here in large numbers blazing like fire-brand. (6)

Jīmūtaketu. Queen, what he says stands to reason. Perhaps it might be so.

Queen. Sunanda, would that my son had perhaps returned to his father-in-law's house by this time. Hence go, ascertain and inform us soon.

Doorkeeper. As the queen commands. [*Exit*

Jīmūtaketu. Queen, would this be the crest-gem of a serpent ?

(ततः प्रविशति रक्तवस्त्रसंवीतः शङ्खचूडः ।)

शङ्खचूडः—(सास्रम्) कष्टं भोः! कष्टं,

गोकर्णमर्णवतटे त्वरितं प्रणम्य
प्राप्तोऽस्मि तां खलु भुजङ्गमवध्यभूमिम् ।
आदाय तं नखमुखक्षतवक्षसं च
विद्याधरं गगनमुत्पतितो गरुत्मान् ॥ ७ ॥

हा निष्कारणैकबान्धव, हा परमकारुणिक, हा परदुःखदुःखित, क्व नु खलु गतोऽसि । प्रयच्छ मे प्रतिवचनम् । हा शङ्खचूड हतक किं त्वया कृतम् ।

नाहित्राणात् कीर्तिरेका मयाप्ता
नापि श्लाघ्या स्वामिनोऽनुष्ठिताज्ञा ।

(*Enter* Śaṅkhacūḍa *wrapped in red clothes*)

Śaṅkhacūḍa. (*Shedding tears*) Alas, alas !

After hastily saluting Gokarṇa on the shore of the sea, I came to the spot where snakes are slaughtered ; and, Garuḍa, having taken that Vidyādhara whose chest was pierced through by his claws and beak, had soared up the sky. (7)

Ah, the only genuine kinsman! Ah most compassionate man! You who are pained at the pains of others. Where have you gone ? Give me a reply. Ah Śaṅkhacūḍa, wretched that you are, what have you done ?

No fame has been earned by me through the protection of a single snake, nor has the commend-

दत्त्वात्मानं रक्षितोऽन्येन शोच्यो
हा धिक् कष्टं वञ्चितो वञ्चितोऽस्मि ॥ ८ ॥

तन्नाहमेवंविधः क्षणमपि जीवन्नपहास्यमात्मानं करोमि। यावदेनमनुगन्तुं प्रयतिष्ये। (परिक्रामन् भूमौ दत्तदृष्टिः)

आदावुत्पीडपृथ्वीं प्रविरलपतितां स्थूलबिन्दुं ततोऽग्रे
ग्रावस्वापातशीर्णप्रसृततनुकणां कीटकीर्णां स्थलीषु।
दुर्लक्षां धातुभित्तौ घनतरुशिखरे गह्वरे स्त्यानरूपा-
मेतां तार्क्ष्यं दिदृक्षुर्निपुणमनुसरन् रक्तधारां व्रजामि ॥९॥

(परिक्रामति।)

---

able order of my master been carried out. Protected that I am by another by the sacrifice of his life, I am to be lamented. Oh fie! Alas! Cheated, cheated I am. (8)

Therefore I shan't make myself the butt-end of ridicule by living even for a moment like this. I will therefore strive to follow him. *(Walking forward, casting his glance on the floor)*

Desirous of meeting Garuḍa, I go, closely following this flow of blood which at the outset is dense by profusion, which afterwards falling at intervals takes the form of big drops of blood, which higher up falling on stones is distributed and spread in the form of tiny particles, which in some places is covered with worms, which in the rocks of red minerals is scarcely perceptible and which

देवी—(ससाध्वसम्) महाराअ । एसो को वि परुण्णवदणो इदो एव्व तुरिअतुरिअं आअच्छन्तो हिअअं मे आउळीकरेदि । ता जाणीअदु दाव को एसो त्ति ।

(ससाध्वसम्) महाराज एष कोऽपि प्ररुग्णवदन इत एव त्वरितत्वरितमागच्छन् हृदयं मे आकुलीकरोति । तज्ज्ञायतां तावत् क एष इति ।

जीमूतकेतुः—यथाह देवी ।

शङ्खचूडः—(साक्रन्दम्) हा त्रिभुवनैकचूडामणे । क्वासि प्रस्थितो मया द्रष्टव्यः । मुषितोऽस्मि भो मुषितोऽस्मि ।

जीमूतकेतुः—(आकर्ण्य सहर्षम्) मुञ्च देवि विषादम् । अस्यायं चूडामणिः, नूनं मांसलोभात् केनापि पक्षिणा मस्तकादुत्खाय

---

appears clotted in the caves of the mountain-slopes thickly covered with trees. (9)

(Walks on)

Queen. (With fear) King, here some one comes with a melancholy face in great speed, who makes my heart agitated. Therefore let it be enquired as to who is this man.

Jīmūtaketu. As the queen says.

Śaṅkhacūḍa. (Crying aloud) Ah! Crest-gem of the three worlds, where have you gone? And where are you to be seen by me? I have been duped. Oh, I have been duped.

Jīmūtaketu. (Listening, with joy) Leave off your sorrow, queen. To this man does this crest-

नीयमानोऽस्मिन् पतितः ।

देवी—(सहर्षं मलयवतीमालिङ्ग्य) अविहवे धीरा होहि । ण खु दे ईदिसी आइदी वेहव्वदुक्खं अणुहोदि ।

(सहर्षं मलयवतीमालिङ्ग्य) अविधवे धीरा भव । न खलु ते ईदृशी आकृतिर्वैधव्यदुःखमनुभवति ।

मलयवती—(सहर्षं) अम्ब तुह एसा आसी । (पादयोः पतति ।)

(सहर्षं) अम्ब तवैषा आशीः । (पादयोः पतति ।)

जीमूतकेतुः—(शङ्खचूडमुपसृत्य) वत्स, किं तव चूडामणिरपहृतः ।

शङ्खचूडः—आर्य न ममैकस्य । त्रिभुवनस्यापि ।

जीमूतकेतुः—कथमिव ।

शङ्खचूडः—दुःखातिशयाद् बाष्पोपरुध्यमानकण्ठो न शक्नोमि

---

gem belong. Surely, this has been snatched from his head by some bird out of greed for flesh, and while being taken it has fallen here.

Queen (Joyfully, embracing Malayavatī) Girl, your husband is alive. Be courageous. Surely, your personality of this type will not suffer the misery of widowhood.

Malayavatī. (With joy) Mother, this is your blessing. *(Falls at her feet)*

Jīmūtaketu. (Approaching Śaṅkhacūḍa) Dear boy, was your crest-gem stolen ?

Śaṅkhacūḍa. Sir, not of mine but of the three worlds.

Jīmūtaketu. How ?

कथयितुम् ।

जीमूतकेतुः—(आत्मगतम्) हन्त हतोऽस्मि । (प्रकाशम्)

आवेदय ममात्मीयं पुत्र दुःखं सुदुस्सहम् ।
मयि संक्रान्तमेतत् ते येन सह्यं भविष्यति ॥ १० ॥

शङ्खचूडः—श्रूयताम् । शङ्खचूडो नाम नागः खल्वहमाहारार्थमवसरप्राप्तो वासुकिना वैनतेयस्य प्रेषितः । किं वा विस्तरेण । कदाचिदियं रुधिरधारापद्धतिः पांसुभिरवकीर्यमाणा दुर्लक्षतामुपयाति । तत् संक्षेपतः कथयामि ।

विद्याधरेण केनापि करुणाविष्टचेतसा ।
मम संरक्षिताः प्राणा दत्त्वात्मानं गरुत्मते ॥ ११ ॥

Śaṅkhacūḍa. My throat being choked with tears out of extreme agony, I am unable to tell you.

Jīmūtaketu. (*To himself*) Alas! I am damned. (*Aloud*)

Son, tell, me (the cause of) your unbearable misery. It has now devolved on me, wherefore it will be endurable for you. (10)

Śaṅkhacūḍa Be it heard. I am a serpent named Śaṅkhacūḍa sent by Vāsuki to Garuḍa for his food at my turn. Why say more? This track of the flow of blood will perhaps become untraceable being covered with sand. So I shall say this in brief—

My life has been saved by some Vidyādhara whose heart was taken possession of by compassion by giving himself up to Garuḍa. (11)

जीमूतकेतुः—(सविषादम्) कोऽन्य एवं परहितव्यसनी । ननु स्पष्टमेवोच्यतां पुत्रेण जीमूतवाहनेनेति । हा हतोऽस्मि मन्दभाग्यः ।

देवी—हा पुत्तअ किं तुए किदम् ।

हा पुत्रक किं त्वया कृतम् ।

मलयवती—हा कहं सच्चीभूदं एव्व मे दुच्चिन्दिदम् ।

हा कथं सत्यीभूतमेव मे दुश्चिन्तितम् ।

(सर्वे मोहं गताः ।)

शङ्खचूडः—(सास्रम्) अये नूनम् एतौ पितरौ तस्य महासत्त्वस्य । अप्रियनिवेदनान्मयैतामवस्थां गमितौ । अथवा विषादृते किमन्यद् विषधरस्य मुखान्निष्क्रामति । अहो प्राणप्रदस्य सदृशं प्रत्युपकृतं जीमूतवाहनस्य शङ्खचूडेन । तत् किमधुनैवात्मानं व्यापादयामि ।

Jīmūtaketu (*Sorrowfully*) Who else will thus be deeply interested in the good of others? Say clearly, 'By your son Jīmūtavāhana.' Ah! I am ruined, unfortunate that I am.

Queen. Ah son, what has been done by you?

Malayavatī. Ah, how have my misgivings come out to be too true?

(*All faint*)

Śaṅkhacūḍa. (*With tears*) Eh, surely these are the parents of that great man. They have been landed by me in this plight by divulging bad news. Or, what else than poison will emerge from the mouth of a snake? Oh, Śaṅkhacūḍa has shown his gratitude in a fitting manner to Jīmūta-

अथवा समाश्वासयामि तावदेतौ । तात समाश्वसिहि समाश्वसिहि । अम्ब समाश्वसिहि समाश्वसिहि ।

(उभौ समाश्वसितः ।)

देवी—वच्छे उट्ठेहि उट्ठेहि । मा रोअ । अह्मे वि किं जीमूदवाहणेण विणा जीवह्म । ता समस्सस दाव ।

वत्से उत्तिष्ठोत्तिष्ठ । मा रुदिहि । वयमपि किं जीमूतवाहनेन विना जीवामः । तत् समाश्वसिहि तावत् ।

मलयवती—(समाश्वस्य) हा अय्यउत्त कहिं तुवं मए पेक्खिदव्वो ।

(समाश्वस्य) हा आर्यपुत्र कुत्र त्वं मया द्रष्टव्यः ।

जीमूतकेतुः—हा वत्स गुरुचरणशुश्रूषाभिज्ञ,

चूडामणिं चरणयोर्मम पातयता त्वया ।
लोकान्तरगतेनापि नोज्झितो विनयक्रमः ॥ १२ ॥

---

vahana who gave his life for him. So shall I at once commit suicide ? Or, first I will soothe these two people. Father, console yourself, console yourself. Mother, console yourself, console yourself.

(*Both recover their senses*)

Queen. Daughter, rise, rise. Don't weep. Are we going to live without Jīmūtavāhana ? Therefore, be consoled for the present.

Malayavatī. (*Being consoled*) Ah, my lord, where are you to be seen by me ?

Jīmūtaketu. Ah dear boy, you that know so well to serve the feet of your parents—

Dropping down the crest-gem at my feet, you have not left off your rule of modesty even while

(चूडामणिं गृहीत्वा) हा वत्स कथमेतावन्मात्रदर्शनोऽसि मे संवृत्तः । (हृदये दत्त्वा) हहह,

भक्त्या विदूरविनताननम्रमौलेः
शश्वत् तव प्रणमतश्चरणौ मदीयौ ।
चूडामणिर्निकषणैर्मसृणोऽप्ययं हि
गाढं विदारयति मे हृदयं कथं नु ॥ १३ ॥

देवी—हा पुत्तअ जीमूदवाहण जस्स दे गुरुजणसुस्सूसं वज्जिअ अण्णं सुहं ण रोअदि, सो कहं दाणिं पिदरं उज्झिअ सग्गसोक्खं अणुभविदुं पत्थिदोसि ।

हा पुत्रक जीमूतवाहन यस्मै ते गुरुजनशुश्रूषां वर्जयित्वान्यत् सुखं न रोचते, स कथमिदानीं पितरमुज्झित्वा स्वर्गसौख्यमनुभवितुं प्रस्थितोऽसि ।

---

going to the other world. (12)

(*Taking the crest-gem*) Oh dear boy, how have you become no more to be seen? (*Applying the crest-gem to his breast*) Ha, ha, ha!

How does this crest-jewel belonging to you who would constantly prostrate at my feet in devotion with head bent low and face turned far downwards—how does this crest-jewel though blunt through frequent rubbings (with my feet,) pierce my heart deeply? (13)

Queen. Ah son Jīmūtavāhana, you who would not like any happiness except the service of your parents, how have you now left your father

जीमूतकेतुः—(सास्रम्) देवि किं वयं जीमूतवाहनेन विना जीवामः, येनैवं विलपसि ।

मलयवती—(पादयोर्निपत्य कृताञ्जलिः) ताद देहि मे अय्यउत्तस्स चूडारअणं, जेण इमं हिअए करिअ जोळणप्पवेसेण अत्तणो सन्दावं अवणेमि ।

(पादयोर्निपत्य कृताञ्जलिः) तात, देहि मे आर्यपुत्रस्य चूडारत्नं, येनेदं हृदये कृत्वा ज्वलनप्रवेशेनात्मनः संतापमपनयामि ।

जीमूतकेतुः—(सास्रम्) पतिव्रते किं मामाकुलयसि । ननु सर्वेषामेवास्माकमयं निश्चयः ।

देवी—महाराअ ता किं पडिवाळीअदि ।

महाराज तत् किं प्रतिपाल्यते ।

जीमूतकेतुः—देवि न खलु किंचित् । किंत्वाहिताग्नेर्नान्येनाग्निना

---

and gone to enjoy the happiness of heaven ?

Jīmūtaketu. (*With tears*) Queen, are we going to live without Jīmūtavāhana, that you lament thus ?

Malayavatī. (*Falling at his feet and joining the palms of her hand*) Father, give me my lord's crest-jewel so that I may place it on my heart, and by entering the fire remove my torture.

Jīmūtaketu. (*With tears*) Chaste woman, why do you confound me ? Of course that is the determination of all of us.

Queen. Emperor, then why do you wait ?

Jīmūtaketu. Queen, not for anything but that for an Āhitāgni (one who has kindled the fires in

संस्कारो विहितः । तदग्निहोत्रशरणादग्नीनादायात्मानमादीपयामः ।

शङ्खचूडः—(आत्मगतम्) हा कष्टम् । ममैकस्य पापस्यार्थे सकलमेवेदं विद्याधरकुलमुत्सन्नं भविष्यति । तदेवं तावत् । (प्रकाशम्) तात न खल्वनिश्चित्यैव युक्तमीदृशं साहसमनुष्ठातुम् । विचित्राणि हि विधेर्विलसितानि । कदाचित् नायं नाग इति ज्ञात्वा जीवन्तमेव जीमूतवाहनं परित्यजेन्नागशत्रुः । तदनयैव तावद् रुधिरधारया वैनतेयमनुसरामः ।

देवी—सव्वहा देवदाणं पसादेण जीवन्तं एव्व मे पुत्तअं पेक्खिस्सं ।

सर्वथा देवतानां प्रसादेन जीवन्तमेव मे पुत्रकं द्रक्ष्यामि ।

मलयवती—(आत्मगतम्) दुल्लहं खु एदं मम मन्दभाआए ।

---

accordance with the Vedic ceremonies) cremation is not enjoined by any other fire. So we shall take the fires from the place where the sacrificial fires are kept and burn ourselves.

Śaṅkhacūḍa. (*To himself*) Alas, for the sake of a single sinner like me this entire family of Vidyādharas will become extinct. So I will do like this. (*Aloud*) Father, it is not proper to take this extreme step without ascertaining. For, strange are the doings of Fate. Perhaps on coming to know that he is not a snake, Garuḍa may leave Jīmūtavāhana alive. So by this self-same track of blood, let us follow Garuḍa.

Queen. By all means, by the grace of Gods, you will see your son alive.

(आत्मगतम्) दुर्लभं खल्वेतन्मम मन्दभाग्यायाः।

जीमूतकेतुः—वत्स अवितथैषा भारती ते भवतु । तथापि साग्नीनामेवास्माकं युक्तमनुसर्तुम् । तदनुसरतु भवान् । वयमप्यग्निहोत्रशरणादग्नीनादाय त्वरिततरमनुगच्छामः । (पत्नीवधूसमेतो निष्क्रान्तः ।)

शङ्खचूडः—तद् यावद् गरुडमनुसरामि । (चलन्नग्रतो निर्वर्ण्य)

कुर्वाणो रुधिरार्द्रचञ्चुकषणैर्द्रोणीरिवाद्रेस्तटीः
प्लुष्टोपान्तवनान्तरः स्वनयनज्योतिःशिखासंचयैः ।
मज्जद्वज्रकठोरघोरनखरप्रान्तावगाढावनिः
शृङ्गाग्रे मलयस्य पन्नगरिपुर्दूरादयं लक्ष्यते ॥ १४ ॥

Malayavatī. *(To herself)* Such a thing is improbable for my unfortunate self.

Jīmūtaketu. Lad, may this utterance of yours be true. However, it is proper for us to follow only with the fire ready. Hence, pursue. We shall also follow you quite expeditiously after taking the fires from the abode of the sacrificial fire.

(Exit along with his wife and daughter-in-law)

Śaṅkhacūḍa. I shall therefore follow Garuḍa. *(Moving and seeing in front)*

Far off on the top of the peak of the Malaya is seen this foe of snakes, converting the mountain-slopes, as it were, into long oval-shaped vessels with repeated strokes of his beak wet with blood, burning the wilderness within his range by the multitudinous flames of the fire emanating from

(ततः प्रविशत्यासनस्थः पुरःपातितनायको गरुडः ।)

गरुडः—(आत्मगतम्) आ, जन्मनः प्रभृति भुजङ्गपतीनश्नता मया न चेदृशमाश्चर्यं दृष्टपूर्वं, यदयं महासत्त्वो न केवलं न व्यथते, प्रहृष्ट एव दृश्यते ; तथाहि—

ग्लानिर्नाधिकपीयमानरुधिरस्याप्यस्ति धैर्योदधे-
मांसोत्कर्तनजा रुजोऽपि वहतः प्रीत्या प्रसन्नं मुखम् ।
गात्रं यन्न विलुप्तमेष पुलकस्तत्र स्फुटो लक्ष्यते
दृष्टिर्मय्युपकारिणीव निपतत्यस्यापकारिण्यपि ॥ १५ ॥

---

his eyes and digging the earth with the edges of his claws which plunge deep and are hard and fierce like the thunderbolt. (14)

(Enter Garuḍa *seated with the* Hero *lain in front)*

Garuḍa. *(To himself)* Ah! A marvel of this kind has never been seen by me while eating the lords of snakes since my birth. For, not merely dees this noble being not feel pain, but he is seen to be only cheerful. Accordingly—

This person who is an ocean of courage does not feel melancholy though his blood is sucked in plenty. His face is bright with joy though he suffers the torment inflicted by me while I tear away his flesh. Here the hair standing on its legs is clearly seen in that portion of his body which has not yet been destroyed, and his look falls on me, a wrong-doer, as on a benefactor. (15)

तत् कौतूहलमेव मे जनितमस्यानया धैर्यवृत्त्या । भवतु, न भक्षयाम्येनम् । जानामि तावत् कोऽयमिति । (अपसर्पति ।)

नायकः—(मांसोत्कर्तनविमुखमुपलक्ष्य ।)

सिरामुखैः स्यन्दत एव रक्त-
मद्यापि देहे मम मांसमस्ति ।
तृप्तिं न पश्यामि तवेह तावत्
किं भक्षणात् त्वं विरतो गरुत्मन् ॥ १६ ॥

गरुडः—(आत्मगतम्) अहो आश्चर्यम् । कथमयमस्यामप्यवस्थायामेवमत्यूर्जितमभिधत्ते । (प्रकाशम् ।)

आवर्जितं मया चञ्च्वा हृदयात् तव शोणितम् ।
अनेन धैर्येण पुनस्त्वया हृदयमेव नः ॥ १७ ॥

Therefore, curiosity is, of course, roused by this courageous state of his. Let it be. I shan't eat him. I will know who this is. *(Goes back)*

Hero. (Seeing him desisting from cutting his flesh)

Blood still flows from the mouths of my veins, and still remains flesh in my body, nor do I perceive satisfaction in you. Oh Garuḍa, why have you stopped from eating ? (16)

Garuḍa. (To himself) Oh marvel ! How does this man speak so nobly even in this plight? *(Aloud)*

With my beak your blood was drawn by me from your heart. But through this courage of yours our heart has been drawn to you. (17)

अतः कस्त्वमिति श्रोतुमिच्छामि ।

नायकः—एवं क्षुदुपतप्तो न श्रवणयोग्यः । तत् कुरुष्व तावदस्मन्मांसशोणितेन तृप्तिम् ।

शङ्खचूडः—(सहसोपसृत्य) नखलु नखलु साहसमनुष्ठेयम् । नायं नागः । परित्यजैनम् । मां भक्षय । अहमसौ तवाहारार्थं वासुकिना प्रेषितः । (उरो ददाति ।)

नायकः—(शङ्खचूडं पश्यन् सविषादमात्मगतम्) कष्टं विफलीभूतो मे मनोरथः शङ्खचूडेनागच्छता ।

गरुडः—(द्वौ निरूपयन्) उभयोरपि भवतोर्वध्यचिह्नमस्त्येव । कः खलु नाग इति नावगच्छामि ।

So I should like to hear who you are.

